गुरुकुल कांगड़ी विश्वविद्यालय

कृपया पुस्तक के ऊपर कोई निशान आदि न लगायें।

श्रीः ।

सरस्वतीमणिमाला ।

(निघण्टुमणिमाला)

वैदिककोषः

जयपुरराजसभाप्रधानपण्डितविद्यावाचस्पति
श्रीमधुसूदनशर्म्मणा मैथिलेन विरचितः ।

प्रथमं संस्करणम् ।

सोऽयं
जयपुरे बालचन्द्रयन्त्रालये मुद्रयित्वा
प्रकाशितः ।
शाके १८२८

मूल्यमाणकाष्टकम् ।

श्रीः ।

भूमिका ।

सुप्रतिपन्नमिदं सर्वैरपि प्रज्ञाचक्षुर्भिर्यद्वेद एव भारतीयानां परं निःश्रेयसकारणम्, असाधारणो गौरवहेतुः, गरीयसी संपच्चेति । स चाद्य सर्वपुरुषार्थहेतुः, कालपर्ययाद्विपर्यस्तमतिभिरस्माभिरत्यर्थमुपेक्षित इत्यपि भावयन्त्येव कालेऽस्मिन् भावुका विपश्चितः । परं चिराद्वेदार्थपरिशीलनपरम्पराया विच्छिन्नत्वेन तदर्थमतितरां प्रयतमानैरपि बहुभिर्नाशानुरूपं फलमुपभुज्यत इति तस्य पुनः प्रचाराय तदर्थबोधनायोपयुज्यमानानामङ्गग्रन्थानां प्रचार इदानीं बहुतरमपेक्ष्यते, अर्थबोधनाय चोपयुज्यमानेष्वपि बहुष्वङ्गेषु कोश एव प्रथमं सोपानमिति लोकसाम्यादेवावगम्येत विद्वद्भिः । वेदाङ्गः कोशश्च समाम्नायापरपर्यायो निघण्टुनामातिप्राचीनो भगवद्यास्ककृतनिरुक्ताख्यभाष्यसंवलितः प्रसिद्ध एवास्त्येव सर्वत्र । परमत्र पठितानां नाम्नां मुक्तकरूपतया

न तानि सौकर्येणाभ्यसितुं पारयन्ति विद्यार्थिनः, न चात्राभ्यसनसौकर्यार्थमुपयुज्यमानः सन्निवेशक्रमोऽपि यथावद् दृश्यते, बहवश्च शब्दा अत्र सन्दिग्धार्थकत्वेनैवोपनिबद्धाः, भाष्यकारेण च भगवता यास्केन सुविचार्य कृतेऽपि तदर्थनिर्णये न ततः सम्यगवगन्तुं पार्यते प्रथमाधिकारिभिः। ताभिरेताभिरनुपपत्तिभिर्जायमानां वेदार्थाधिगमेच्छूनामुत्साहहानिमालोक्य तन्निवर्तनाय यथाशक्यमहं प्रावर्तिषि। तत्र देशेऽस्मिंश्चिरात्प्रवृत्तां पद्यमयकोशाभ्यसनपरिपाटीमनुरुध्य पद्यमयेनानेन प्रबन्धेन निघण्टूक्ताः शब्दाः प्रकरणशो विभज्योपनिबद्धाः सन्दिग्धाश्चापि निरुक्तप्रतिपादितार्थेन व्याख्याताः, किं च बहुतरोपयुक्तो दैवतनिरूपणांशोऽपि निरुक्तानिवृतः सूक्ष्मरूपेणेह प्रतिपादितः। तदवश्यं सम्यगभ्यस्तोऽयं निबन्धो वेदार्थविज्ञानप्रेप्सूनामत्यर्थमुपकुर्यादिति विश्वसिमः।

अत्र च ग्रन्थे निघण्टुप्रतिपादिता एव शब्दा उपनिबद्धा नातिरिक्ताः। यद्यपि सन्त्येवापरेऽपि बहवः शब्दा वेदेषु श्रूयमाणा ये नोपनिबद्धा भगवता निघण्टुकृता, न

च स्पृष्टा भगवता यास्केनापि; परं नैतेऽत्राप्युपनिबद्धाः। तेषामपि तु शब्दानां ब्राह्मणग्रन्थानुसारि निरूपणं चिकीर्षितमस्माभिः; तद्यदि ग्रन्थमिमं पर्यालोच्य प्राज्ञवरा वर्द्धयिष्यन्त्यस्मदुत्साहं तर्ह्यचिरादेवापरेण भागेन निघण्टुष्वनभिहितानामपि शब्दानां कोशं प्रकाशयिष्यामः। अन्ततश्च प्रीयतामेतेन व्यापारेण भगवान् भूतभावनो वेदपुरुष इत्याशासाना यत्नमिमं सफलयितुं विदुषां सापेक्ष दृष्टिपातमभ्यर्थयामहे। इति शुभम्।

वैदिककोषस्य विषयानुक्रमः ।

मनुष्यवर्गो—

इति शुभम् ।

ॐ तत्सत् ।

ऋग्यजुःसामभिस्तत्त्वं निर्दिशन् सर्वतः सुखम् ।
प्रवर्तयन् ज्ञानरूपी भगवान् मे प्रसीदतु ॥ १ ॥

वेदमन्त्रस्तुताः सर्वा निर्दिश्यन्तेऽथ देवताः ।
सोमपास्तु त्रयस्त्रिंशत् त्रयस्त्रिंशदसोमपाः ॥ २ ॥

आदित्या वसवो रुद्रा विश्वेदेवगणावपि ।
प्रजापतिवषट्कारौ वाश्विनौ वेति सोमपाः ॥ ३ ॥

प्रयाजाश्चानुयाजाश्चावयाजाश्चेत्यसोमपाः ।
एकादशक्रमेणैते भूमौ मध्ये दिवि स्थिताः ॥ ४ ॥

अथाग्निरिन्द्रवायुश्चादित्यश्चेति प्रधानतः ।
देवतास्तिस्र एवैताः पृथ्वी–मध्य–दुस्त्वधिष्ठिताः ॥ ५ ॥

आदित्यस्यादित्या, रुद्रा इन्द्रस्य, वसवोऽग्नेः, ।
अधिदेवा अथ मरुतो देवविशो रुद्रपुत्राश्च ॥ ६ ॥

अथवेन्द्रस्य तु मरुतो, रुद्राः सोमस्य, वसवोऽग्नेः ।
आदित्या वरुणस्य तु गणिनः सहवासिनो देवाः ॥ ७ ॥

द्रविणोदा जातवेदा वैश्वानर इमेऽग्नयः ।
पार्थिवा उत्तरत्रापि प्रयोगो दृश्यते क्वचित् ॥ ८ ॥

द्वादश आप्रिय एता, बर्हिर्द्वारस्तनूनपादिध्मः ।
ईल उषासानक्ता, स्वाहाकृतयो नराशंसः ॥ ९ ॥

दैव्या होतारा अपि, तिस्रो देवीर्वनस्पतिस्त्वष्टा ।
एषामभिधेयार्थे मतभेदो दृश्यते विदुषाम् ॥ १० ॥

अथ सत्त्वानि वर्ण्यन्ते पृथिव्यायतनानि हि ।
अश्वः शकुनिमण्डूकावक्षा ग्रावा नरस्तुतिः ॥ ११ ॥

वृषभो द्रुघणो नद्य आप ओषधयः पितुः ।
रात्रि-श्रद्धा-पृथिव्यप्वारण्यान्यग्नायि चेत्यपि ॥ १२ ॥

रथ-दुन्दुभि-हस्तघ्ने-षुधी-षु-ज्या-धनुः-कशाः ।
अभीषु-कवचादीनि युद्धोपकरणानि च ॥ १३ ॥

शुनासीरौ हविर्धाने मुसलोलूखले तथा ।
देवी ऊर्जाहुती, देवी जोष्ट्री, आर्त्नी च रोदसी ॥ १४ ॥

विपाट्शुतुद्र्याविसष्टौ द्वन्द्वान्यन्यानि यान्यपि ।
इति षट्त्रिंशदुक्तानि स्तूयन्ते यानि भूरिशः ॥१५॥

नद्यो नव, सुषोमा चार्जीकीया च वितस्तिका ।
असिक्नी च परुष्णी च शुतुद्री च सरस्वती ॥१६॥

गङ्गा च यमुना चेति स्तूयन्ते तत्र तत्र हि ।
सिन्धुर्विपाट् वितस्ता च चन्द्रभागा इरावती ॥१७॥

शतद्रुरिति चैतासामादितो लौकिकाभिधाः ।
अन्त्यास्तिस्रः प्रसिद्धाख्या उक्ता एतास्तु भूगताः ॥१८॥

इति भूमिष्ठा देवताः ॥

वायुर्वरुणरुद्रेन्द्राः पर्जन्योऽथ बृहस्पतिः ।
वास्तु-क्षेत्र-ब्रह्म-वाचां पतयोऽपांनपाद् यमः ॥१९॥

कः सरस्वान् विश्वकर्म्मा मित्र—तार्क्ष्यक मन्यवः ।
दधिक्राः सविता त्वष्टा वातोऽग्निरिति मध्यगाः ॥२०॥

श्येन–प्रजापति–सुपर्ण—पुरूरवोऽहि–
विश्वानरा निधन-धातृ-विधातृ-सोमाः।
एतेऽपि पूर्ववदिहापि च हव्यभाजो
वेनोऽसुनीतिऋत इन्दुरिमे त्वहव्याः ॥ २१ ॥

मरुतो रुद्राः पितरो भृगवोऽङ्गिरसोऽप्यथर्व ऋभवः स्युः।
अथ च वशिष्ठा आप्त्या एता गणदेवतास्तत्र ॥ २२ ॥

अदितिः सरमा पृथिवी, राकाऽनुमतिः कुहूः सिनीवाली।
अघ्न्या सरस्वती वाग्, गौरी गौरुर्वशी यमीन्द्राणी ॥ २३ ॥

धेनुरिलोषाः पथ्यास्वस्तिर्वै रोदसी, स्त्रियस्त्वेताः।
एते सर्वे देवा मध्यस्थाना विनिर्दिष्टाः ॥ २४ ॥

इति अन्तरिक्षस्था देवताः।

अथ देवा द्युस्थानाः, सविता भगसूर्यपूषणो विष्णुः।
विश्वानरोऽथ वरुणः, केशि-वृषाकपि-यम-कपातसिन्धु २५

दध्यङ्ङथर्वमनवोऽथ सप्तऋषयो वसुश्च नासत्यः ।
दस्रोऽपि त्वष्टोषा वृषाकपायी–सरण्यु–सूर्याश्च ॥ २६ ॥

धाता मित्रो वरुणोऽर्यमा भगोंऽशुर्विवस्वांश्च ।
इन्द्रश्चादितिपुत्रास्त्वष्टृ सवितृ-पूष-विष्णवोऽप्युक्ताः॥२७॥

सप्तर्षयोऽथ देवा विश्वेदेवाश्च साध्यदेवाश्च ।
द्युस्थानानां संज्ञाः प्राणानां वाथ रश्मीनाम् ॥२८॥

अग्निश्चेन्द्रश्चादित्यरश्मयो वासवाः कथिताः ।
इन्द्राणीवरुणान्यग्नाय्याद्या देवपत्न्यः स्युः ॥ २९ ॥

अग्निर्वरुण आदित्य इन्द्र आदित्यरश्मयः ।
यज्ञः सोमोऽश्विनौ वाचश्चेत्यतिस्तुतयो मताः ॥ ३० ॥

पितरः प्रायशोऽथर्व–ऋभुभृग्वङ्गिरोगणाः ।
आप्त्या नामर्षयस्त्रेधा एकताश्च द्वितास्त्रिताः ॥ ३१ ॥

केशिनः कथिता अग्निर्वायुः सूर्य इति त्रयः ।
प्रजापतय उद्दिष्टाः सूर्यसंवत्सराद्यः ॥ ३२ ॥

भारतीडासरस्वत्यस्तिस्रो देव्य उदाहृताः ।
दिवि भुव्यन्तरिक्षे च क्रमेण निवसन्ति याः ॥ ३३ ॥

इति दिविष्ठा देवताः ॥

इति दैवतवर्गः १

दिव्यवर्गः २

द्यावापृथिव्यौ–

स्वधे पुरन्धी धिषणे रोदसी सद्मी मही ।
अही गभीरे गम्भीरे ओण्यौ चम्वावथादिती ॥ १ ॥
अम्भसी नभसी क्षोणी सद्मनी बहुले अपि ।
उर्वी पृथ्वी च रजसी पार्श्वौ घृतवती अपि ॥ २ ॥
दूरे अन्ते अपारे च बृहती रोधसी अपि ।
नप्त्रौ द्यावापृथिव्योस्तु नामान्येतानि सन्ति हि ॥ ३ ॥

पृथ्वी—

भूर्भूमिरवनिः पूषा गातुर्गोत्राऽदितिः क्षितिः ।
क्षोणिः क्षामा मही पृथ्वी गौरिला निर्ऋती रिपः ॥ ४ ॥

उर्वी ग्मा ज्मा त्तमा क्ष्मा त्ता पृथिव्या अभिधा इमाः।

हिरण्यम्—

हेम चन्द्रमयो रुक्मं हिरण्यममृतं मरुत ॥ ५ ॥
लोहं पेशो जातरूपं कनकं भर्म्म काञ्चनम् ।
कृशनं द्वत्रमित्येता हिरण्यस्याभिधा मताः ॥ ६ ॥

अन्तरिक्षम्—

वियदम्बरमाकाशं व्योम पुष्करमध्वरम् ।
भूः स्वयम्भूः पृथिव्यापोऽन्तरिक्षं धन्वबर्हिषी ॥ ७ ॥
अध्वा समुद्रः सगरोऽन्तरीक्षस्याभिधा इमाः ।

किरणाः—

खेदा तु किरणा गावो रश्मयोऽभीषवो वनम् ।
गभस्तयो दीधितयः साध्या उस्रा मरीचिपाः ॥ १० ॥
सुपर्णाः सप्तऋषयो मयूखा वसवोंऽशुषु ॥ ११ ॥

दिशः—

हरितः ककुभः काष्ठा आष्ठा व्योमोपरा दिशः।
आता आशा दिशामाख्या एताः प्रायेण भूमनि ॥ ६ ॥

दिनम्—

भानुर्घर्म्मो घृणो घ्रंसो वासरं स्वसराणि च ।
वस्तोर्दिनं दिवा द्युर्द्यौर्द्यविद्यवि दिवेदिवे ॥ १२॥

उषाः—

अहना द्योतना श्वेत्या वाजिनी वाजिनीवती ।
ओदती भास्वती सुम्नावरी चित्रा मघाऽर्जुनी ॥ १३ ॥
विभावरी सूनरी च सूनृता सूनृतावती ।
सूनृतावर्य्यरूषी स्यादरुषीत्युषसोऽभिधाः ॥ १४ ॥

रात्रिः—

नक्ताऽक्तुः शर्वरी श्यावी शोकी मोकी हिमा रजः ।
पयः पयस्वती वस्त्री तमोऽसिक्नी तमस्वती ॥ १५ ॥
दोषोर्म्योधि उधा राम्या घृताची शिरिणा त्रपा ।
यम्या नम्येति नामानि रात्र्या इति विभावय ॥ १६ ॥

मेघः—

अद्रिर्गोत्रो गिरिर्ग्रावा पर्वतोऽश्मा व्रजो बलः ।
अभ्रं बलाहको मेघो वराहः शम्बरश्चरुः ॥ १८ ॥

रौहिणो रैवतो वृत्रः फलिगाह्युपरोपलाः ।
वृषन्धिरसुरः कोशश्चमसो दृतिरोदनः ॥ १९ ॥
वलिशानः पुरुभोजा अश्मो मेघाभिधा इमाः ॥ २० ॥

जलम्—

इदं जलं जलाषं वार्वारि तेजः स्वधा वनम् ।
गभीरं गम्भरं शुक्रं कृपीटं गहनं वपुः ॥ २१ ॥
तूयं तोयं शम्बरं सत् पवित्रममृतं घृतम् ।
अभ्रमम्बु हविः पूर्णं सर्वं सर्पिरपोऽक्षितम् ॥ २२ ॥
नामान्नं बर्हिरीमाप इन्दुर्हेम महो महत् ।
स्वःसर्गाः सद्म सदनं सुखं क्षत्रं शुभं यशः ॥ २३ ॥
भविष्यद् भुवनं भूतमृतं सत्यं रयिः प्रयः ।
रसः सरः सहो व्योम यादुरोजो यहः शवः ॥ २४ ॥
तुग्र्या सतीनं सर्णीकं स्यूतीकं भेषजं क्षपः ।
आवया अक्षरं स्रोतस्तृप्तिर्जाम्यायुधान्यहिः ॥ २५ ॥
सुक्षेम धरुणं जन्म क्षीरं नीरं बुसं विषम् ।
कबन्धं बर्बुरं रेतः पुरीषं पिप्पलं मधु ॥ २६ ॥

कशः कबन्धं सलिलं घस्मन्वदुदकं सिरा ।
त्तोदः त्तद्म नभोऽम्भोऽर्णो अररिन्दानि जामिवत् ॥ २७ ॥
ऋतस्य योनिर्योनिः कं जलनामानि भावय ।

नदी--

यव्या अवनयः सीराः स्रोत्याः खा धुनयोऽशुवः ॥ २८ ॥
एन्यो रुजाना हरितः सरितो रोहितोऽजिराः ।
स्वादो अर्णा रोधचक्रा उर्व्यो वर्ध्यश्च सस्रुतः ॥ २९ ॥
नभन्वा वक्षणा वध्वः कुल्या अर्णाश्च सिन्धवः ।
हिरण्यवर्णाः पार्वत्य इरावत्यश्च मातरः ॥ ३० ॥
हरस्वत्यस्तरस्वत्यः सरस्वत्यः स्रवन्तिकाः ।
ऊर्जस्वत्यः पयस्वत्यो रोधस्वत्यश्च निम्नगाः ॥ ३१ ॥
भास्वत्यो नद्य इत्येवं नदीनामानि भावयेत् ।

अश्वाः--

अत्यो वाजी हयः सप्तिरवौच्चैःश्रवसोऽरुषः ॥ ३२ ॥
दधिक्रावा दधिक्राश्च दौर्गह-ब्रध्न-वह्नयः ।
तार्क्ष्यो मांश्चत्व आशुश्च पैद्व एतग्व एतशः ॥ ३३ ॥

अश्वाः सुपर्णा हंसासः श्येनासोऽव्यथयो नरः ।
ह्वार्याः पतङ्गा इत्येते सामान्येनाश्ववाचिनः ॥ ३४ ॥

※

पूष्णोऽजाः, सवितुः श्यावाः, विश्वरूपा बृहस्पतेः, ।
अश्विनो रासभद्वन्द्वं, पृषत्यो मरुतामपि, ॥ ३५ ॥
हरी इन्द्रस्य, हरितस्त्वादित्यानामथोषसाम् ।
गावोऽरुण्योऽथ नियुतो वायोर्वह्नेस्तु रोहितः ॥ ३६ ॥

इति दिव्यवर्गः ।

मनुष्यवर्गः २

मनुष्यः—

जगतस्तस्थुषो मर्त्या मर्ता मर्या धवा नरः ।
द्रुह्यवस्तुर्वशा व्राता जन्तवः क्षितयो विशः ॥ १ ॥
मनुष्या नहुषः कृष्टिहरिचर्षणयो नरः ।
विवस्वन्तः पञ्चजना यदवः पूरवोऽनवः ॥ २ ॥
आयवः पृतना एते मनुष्यार्थाभिधायकाः ।

मेधावी—

मन्धाता मतयो मनश्चिद्दुशिजो वेनो विधाता विपः
कीस्तासोऽपि विपन्यवोऽपि मतुथा आकेनिपः केनिपः ।
धीरो विप्रविपश्चिताभ्रुकवी अद्धातयो वाघतो
सूतसः कण्वमनीषि-वेधस इमे विप्रो नवेदाः समाः ॥३॥

स्तोता—

रेभस्तामुर्नदो नादः सूरि-स्तुप्-कारु-कीरयः ।
छन्दो रुद्रः कृपण्युर्गौर्जरिता स्तोतृवाचकाः ॥ ४ ॥

ऋत्विक्—

भरताः कुरवो वृक्तवर्हिषोऽपि यतस्रुचः ।
सबाधो वाघतो देवयवो मरुत ऋत्विजः ॥ ५ ॥

अध्यक्षः—

अर्यो नियुत्वान् राष्ट्री स्युरीश्वरार्था इनः पतिः ।

चौरः—

तक्का रिक्का रिपू रिभ्वा रिहायास्तायुतस्करौ ॥ ६ ॥

तृपुस्तृका वृको रिह्वा हुरश्चिच्च मलिम्लुचः ।
अघशंसो मुषीवांश्च वनर्गुः स्तेनवाचकाः ॥ ७ ॥

अपत्यम्—

तुक् तोकं तनयस्तोकम तक्मापत्यं नपात् प्रजा ।
बीजमप्नो गयः शेषो यहुर्जाः सूनुरित्यपि ॥ ८ ॥

इति मनुष्यवर्गः ॥ ३ ॥

धर्म्मवर्गः ४

महान्—

महिषस्तविषस्तवसो रभसः ककुहो महद् बृहद् ब्राधन् ।
ऋष्वोऽद्भुतं विरप्शी बंहिष्ठो बर्हिषद् विहायाश्च ॥ १ ॥
अम्भोऽम्भृणो गभीरो माहिन ऋष्वो विवक्षसे तुत्तः ।
उक्षित उत्तर्भुक्ता ववक्षिथो यह्व—इत्यमी महति ॥ २ ॥

क्षुद्रः—

क्षुल्लकेऽल्प ऋहन् ह्रस्वः प्रतिष्ठा मायुकः कृधु ।
अर्भको वभ्रको दभ्रं निघृष्वस्तृपमः समाः ॥ ३ ॥

बहुः—

उरु पुरु शश्वद् विश्वं परीणसा व्यानशिः कुवित्सलिलम् ।
तुवि च शतं च सहस्रं भूरि च बहुवाचका एते ॥ ४ ॥

समीपः—

आसात् स्यादस्तमीके च तुर्वशे तडिदम्बरम् ।
आके उपाके अर्वाके अवमे उपमेऽन्तमम् ॥ ५ ॥
अन्तिकार्था इमे प्रोक्ता अथ दूरार्थकाः परे ।

दूरः—

आरे आके पराके च पराचैश्च परावतः ॥ ६ ॥

पुराणः—

प्रत्नयाः प्रदिवोऽह्नाय पूर्व्यं प्रत्नं सनेमि च ।

नवीनः—

इदानीं नूतनं नूत्नं नवं नव्यमिदा इति ॥ ७ ॥

अन्तर्हितः—

निण्यं सस्वरपीच्यं च प्रतीच्यं सनुतर्हिरुक् ।
पुराणे षट्, नवीने षट्, निर्णीतान्तर्हितस्य षट् ॥ ८ ॥

सुन्दरः—

अनवद्योऽनभिशस्तः पाकोऽनेद्योऽप्यनिन्द्य उक्थ्योऽपि ।
वयुनमनेमाऽस्त्रेमा वामस्तुनीथौ प्रशस्यनामानि ॥ ९ ॥

रूपम्—

पेशः पिष्टं वपुरपुर्वव्रिर्वर्पोऽमतिम्र्म्रक्त ।
प्सरः प्सुरप्सः कृशनमरुषं शिल्पमर्जुनम् ॥ १० ॥
अप्रस्ताम्रं च निर्णिक् च रूपनामान्यमूनि हि ।

हस्तौ—

अथ बाहू च भुरिजावभीशू च विनङ्गृसौ ॥ ११ ॥

क्षिपस्ती च गभस्ती च भरित्रे चायती च तौ ।
अप्नवाना च्यवाना च करस्नौ शक्करी करे ॥ १२ ॥

अङ्गुलयः--

अगव्योऽग्रुवो विशः शर्य्या रशना धीतयो धुरः ।
अथर्य्योऽवनयः कक्ष्या योजनानि विपः क्षिपः ॥ १३ ॥
स्वसारोऽभीशवः शाखा जामयश्च सनाभयः ।
गभस्तयो दीधितयो योक्त्राणि हरितस्तथा ॥ १४ ॥

कर्म—

कर्त्ताः कर्त्वं करन्ती ऋतु-करुण-करः कर्त्तवे कर्तुमप्नः
कृत्वी चक्रत् करिक्रद् व्रत-करण-शची- शक्तयः कर्वरं धीः ।
विष्टी वेषश्च वेपोऽप-इति शिमि-शमी-शक्म शिल्पं च दंसो
नामान्येतानि वेदे कलयति कुशलः कर्म्माणि व्यत्ययाच्च ॥

यज्ञः—

यज्ञो वेनोऽध्वरो मेधो विदथः सवनं मखः ।
इष्टिर्होत्रा देवताता विष्णुरिन्दुः प्रजापतिः ॥ १६ ॥
घर्म्म नार्य्यः पञ्चदश यज्ञनामानि चक्षते

सप्तम्--

सप्ते सप्तस्मृतं सप्ता श्रादित्याद्धा वडित्यमी ॥ १७ ॥

वाक्--

श्लोको घोषो गणो वाणः स्वनः शब्दः स्वरः सरः ।
धारा गौरी गौरिला गीर्गान्धर्वी भारती गणा ॥ १८ ॥
गाथा गभीरा गम्भीरा मन्द्रा मन्द्राजनी नना ।
वाशी वाणी च वाणीची सूर्य्या स्वाहा सरस्वती ॥ १९ ॥
नौर्धेनुर्धिषणा धेना मेना मेडिः कशा निवित् ।
होत्रा ऋक् धमनिर्नाडीर्म्मायुकाकुदुपब्दयः ॥ २० ॥
वागनुष्टुप् शची गल्दा वल्गुर्वग्नुर्विपा पविः ।
सुपर्णी वकुरो जिह्वा मही ग्राऽदितिरक्षरम् ॥ २१ ॥
एतानि सप्तपञ्चाशद्वचो नामानि चक्षते ।

प्रज्ञा--

केतुः केतश्चेतश्चित्तं माया शची क्रतुर्वयुनम् ॥ २२ ॥
धीरसुरेवमभिख्या प्रज्ञानामानि कथ्यन्ते ।

सुखम्----

शिम्बाता शतरा शर्म शिवं शेवं च शेवृधम् ॥ २३ ॥
स्योनं सुम्नं शुनं शूषं जलाषं भेषजं मयः ।
सुग्म्यं शग्मं शातपन्ता स्यूमकं सुदिनं तथा ॥ २४ ॥
शिल्गुः शं कमिमे शब्दाः सुखार्था एकविंशतिः ।

बलम्--

ओजः पाजः शवः शर्द्धस्तृक्षं त्वक्षस्तवस्तरः ॥ २५ ॥
शूषं शुष्णं वीडु शुष्मं नृम्णं च्यौत्नं यहः सहः ।
दक्षो वर्गो वधो बाधो वृजिनं वृक्तु च शम्बरम् ॥ २६ ॥
स्यन्द्रासो द्रविणं पौंस्यं धर्णसिस्तविषी तथा ।
मज्मना बलनामानि पदार्थज्ञाः प्रचक्षते ॥ २७ ॥

क्रोधः---

हरो ह्वरो हृणिर्जूर्णिरेहो हेडो व्यथिस्त्यजः ।
भामो मन्युश्च तपुषी क्रोधनामानि मानय ॥ २८ ॥

वज्रम्---

मेनिर्नेमिर्नमः कुत्सः कुलिशः सायकस्तुजः ।

स्तृको वृको वधो वज्रः स्वधितिः परशुः पविः ॥ २९ ॥
हेतिर्दिद्युत्तिग्ममर्को वज्रनामानि भावय ।

युद्धम्—

दिवाग् विखादो नदतुः प्रधने च महाधने ॥ ३० ॥
पृतनाः पृतनाज्यं च पृत्ते पृत्सु खले खजे ।
स्पृधो मृधो भरे मीढ्वे पौंस्य आक्रन्द आहवे ॥ ३१ ॥
आजावाणौ वाजसातौ शूरसातौ च सद्म च ।
वृत्रतूर्ये समर्ये च समोहे च समत्सु च ॥ ३२ ॥
समीथे सङ्गथे सङ्गे सङ्गमे संयुगेऽज्म च ।
समितिः समनं सङ्काः संख्ये संयच्च संवतः ॥ ३३ ॥
समनीके समीके चाभीके समरणे रणः ।
ममसत्यं नेमधिता वाजे सङ्ग्रामवाचकाः ॥ ३४ ॥

धनम्---

रेक्णो रिक्थं मघं वेदो वरिवो बन्धुरिन्द्रियम् ।
श्वात्रं त्रत्रं रयी रत्नं भगो मीढुं गयस्तना ॥ ३५ ॥

रायो राधो यशो मेधा भोजनं द्रविणं वसु ।
द्युम्नं नृम्णं वृतं वृत्रं श्रवो ब्रह्म धनार्थकाः ॥ ३६ ॥

गौः—

अघ्न्योस्रियोस्रा जगती शक्वरीलादितिर्म्महो ।
अशीति नव नामानि गवामित्यवधारय ॥ ३७ ॥

अन्नम्—

वाजोऽन्धः क्षु सुतः सिनं पितुरवो ब्रह्म स्वधा सूनृता
दक्षार्कः ससमायुरूर्गिषमिरा नेमो नमः क्षुद्रयः ।
पृक्षो धासिरिला यशो रसपयोवर्चःप्रयांसि श्रवः
कीलालं क्षुमदेव सीनमिति वा पाजोऽपि वाऽन्नार्थकाः ३८

गृहम्—

अस्तं पस्त्यं नीडं, कृत्तिः कुदरो गयो गर्त्तः ।
दुर्य्याः सद्म दुरोणे, शरणं स्वसराणि योनिरमा ॥ ३९ ॥
छाया छर्द्दिश्छादिरपि, वर्म्म च हर्म्य्यं वरूथं च ।
अज्म च शर्म्म दमे गृहनामानि त्रीणि विंशतिश्चेति ॥ ४० ॥

कूपः---

कूपे कर्तः कातुः खातः काटोऽवटोऽवतो वव्रः ।
केवट उत्सः कारोतरः क्रिविः सूद ऋश्यदः कुशयः ॥४१॥

प्रज्वलनम्—

ज्वलतो नामधेयानि शृङ्गं स्यात् कल्मलीकिनम् ।
जञ्जणाभवदित्येवं मल्मलाभवदित्यपि ॥ ४२ ॥
अर्चिः शोचिस्तपस्तेजो हरो हृणिवृणी जमत् ।

शीघ्रः—

क्षिप्रार्थे तुज्यमानासस्तूतुजानो नु तूतुजिः ॥ ४३ ॥
भुरण्युरजिरं जीरा जूर्णिस्तूर्णिः शु साचिवित् ।
आशु प्राशुः शीभमोषं मक्षु शूर्ता तृपु द्रवत् ॥ ४४ ॥
वातरंहाः शूघनासस्तूयं ताजद् द्युगद् युगत् ।
अत्रास्तरणिरित्येते—धर्म्मवर्गोऽयमीरितः ॥ ४५ ॥

इति धर्म्मवर्गः ४

क्रियावर्गः ५

लोठते कसति लोटतेऽयते स्यन्दते स्यमति वर्ततेऽवति ।
स्रंसति स्रवति सर्पतीषति ध्वंसति ध्रजति मार्ष्टि वञ्चति
कालयत्यतति गाति सश्चति श्चोतति भ्रमति पेलयत्यपि
कण्टति स्वरति सर्स्ते सिसर्त्त्यार्य्यति ज्रयति हर्यतीङ्खते
नक्षति क्षियति सक्षतीषति म्यक्षति त्सरति जेहतेऽर्दति
मर्दति ध्रपति हन्ति जिन्वति ध्राति वाति पवते भुरण्यति
द्राति याति पततीन्वति द्रमत्येजति द्रवति वेति वेनति
प्साति सेधति जिगाति रेजति द्रूळति ध्रति ऋणोति ऋण्वति
रीयतेऽरुषति सीयते धवत्येति धावति तुरीयतीति च
ऋच्छति व्रजति डीयतेऽनिति क्षोदति प्लवति युध्यतीति च
इयर्ति ईर्त्ते यतते रथर्यति विषिष्टि योषिष्टि रिणाति दीयति
इयक्षतिक्षुम्पतिरंहतिक्षिणोत्यृणोतिजङ्गन्तिजगान्तिगन्तिच
पिस्यति;विस्यति,मिस्यति दध्यति दध्नोति धन्वति ध्रुवति
मवते प्लवते च्यवते कवते गवते च नवते च ॥ ७ ॥
चतति च चसति च शवति च हनति च वहते मिनाति धमतीति
रजति च लजति च तकति श्वात्रति नसते मिनोति फणतीति

जम्रति च जसति च जमति च गमाति जगायादगन्नजगन् ।
अयथुः प्त्रःकति हन्तादु हयति हयन्तादथागनीगन्ति ॥९॥
सस्रति सिस्रति हम्मति हम्यति दभ्नोति कणति नख्यति च
रूठति राति जगाति द्रुम्मत्याद्या गतिक्रिया बोध्याः॥ १०॥

व्याप्तिः—

आनडाक्षाण आपानोऽप्यानशे नशदश्नुते ।
नक्षतीन्वसशश्चाष्ट दश व्याप्तिक्रिया इमाः ॥ ११ ॥

ईशनम्—

ऐश्वर्यार्था राजति रज्यति क्षयति पत्यते ।

अध्येषणा—

परिस्रव पवस्वाऽभ्यर्षाशिषोऽध्येषणाक्रियाः ॥ १२ ॥

अर्चा—

अर्चति गायति रेभति नदति पपृक्षा गृणाति गूर्द्धयति ।
वल्गूयति शशमानो जरते रञ्जयति मन्यते मदति ॥ १३ ॥

शंसति रसति पनस्यति पनायते भनति वेनति स्तौति ।
नौति च यौति च रौति च रजयति वाजयति पूजयति॥१४॥
स्वदति स्वरति स्तोभति पृच्छति जल्पति च कल्पते धमति
पणते रिहति पणायति सपति कृपायति कृपण्यति ह्वयते ।
मन्त्रयते मन्द्रयते छन्दति च च्छदयते च महयति च ।
एतेऽथ वन्दते चाथ भन्दते चाथ मन्दतेऽर्च्यर्थाः ॥ १६ ॥

परिचर्या—

परिचरणे तु इरज्यति सपति विवासति ऋणद्धि ऋध्नोति॥
ऋच्छति किञ्च सपर्यति विधति नमस्यति दुवस्यति च ॥

याचना—

यन्तारः पीपरत पूर्द्धि मदेमहि मनामहे ।
मन्महे मायते यामि यन्धीषुध्यति चेमहे ॥ १८ ॥
मिमिड्ढि च मिमीहीति रिरीहीति रिरिड्ढि च ।
दाद्धि शग्धीत्यमी शब्दाः श्रूयन्ते याचनक्रियाः ॥ १६ ॥

ईक्षणम्--

चष्टे विचष्टे विचर्षणिरचाकशत् ।
विश्वचर्षणिराचक्ष्म विचर्षणिरितीक्षणे ॥ २० ॥

इच्छा—

वष्टि वेति वनोति वेनति कानिषत् कनतीति च
चकन्तसदुश्मसि वश्मि वेशति मन्यते जुषतेऽपि च ।
चाकनञ्चकमान आचक एव हर्य्यति वाञ्छति
व्याहरन्ति हि कान्तिकर्म्मणि कोविदा उशिगित्यपि ॥ २१ ॥

दानम् —

तुञ्जति शिक्षति दाशति दाति च दासति च राति रासति च
अपि च पृणक्ति पृणाति च मंहत एते हि दानकर्म्माणः २२ ॥

भोजनम्—

वभ्धां बभस्त्यावयति भसथो वेति भर्वति ।
ह्वरत्याविष्यन् वेवेष्टि वप्सतीत्यत्तिकर्म्मणि ॥ २३ ॥

प्रज्वलनम्––

भ्राजि-भ्राशी भ्राश्यतिश्च मन्दि-मन्दि-द्युति-ज्युति ।
रुक् शोचती दीद्यति द्युमज्ज्वलतिकर्म्मकाः ॥ २४ ॥

क्रोधनम्—

रोडि-हेडी कम्पि-भोजी भामिर्भ्रेषति दोधति ।
हृणीयते च भ्रीणाति वनुष्यति क्रुधिक्रियाः ॥ २५ ॥

हननम्––

दभ्नोति धूर्वति वृणक्ति तडिच्छृणाति
द्रूणाति ताढि नभते धमति स्तृणाति ।
रम्णाति क्रणवति मिनाति मिनोति शम्ना-
त्याखण्डलार्दयतियातयती वियातः ॥ २६ ॥
स्नथयति तृणेढि वृश्चति
निवपन्तु श्वसिति कृन्तति ध्वरति ।
स्नेहयति वर्हयत्यव–
तिरति स्नेहति नितोशते श्वसति ॥ २७ ॥

श्लथति श्रथति स्फुरति
स्फुलति च निबर्हयति जूर्वति च ।
आतिरदर्दति मर्दति
वधकर्म्माणो बुधैरुदिताः ॥ २८ ॥

शयनम्—

द्वौ तु स्वपितिकर्म्माणौ सस्ति च स्वपितीति च ।
इत्येवं पञ्चदशभिः क्रियावर्गोऽयमीरितः ॥ २९ ॥

इति क्रियावर्गः ५

उपसर्गवर्गः ६

आ इत्यर्वागर्थे, प्रपरेति प्रातिलोम्यमेतस्य ।
अभिरभिमुखतां, प्रतिरिति तद्विपरीतं समाचष्ट ॥ १ ॥

अतिमू पूजितमर्थं, प्राहतुरनयोर्विपर्य्ययं निर्दुः ।
अवनी विनिग्रहार्थौ, वुदिति प्रतिलोमतामनयोः ॥ २ ॥

एकीभावं समिति,व्यपेति तस्माद्विपर्य्ययं ब्रूतः ।
अधिरर्थद्वयमाहोपरिभावं तद्वदैश्वर्य्यम् ॥ ३ ॥

सादृश्यापरभावं संसर्गोपजन— सर्वतोभावान् ।
क्रमतोऽन्विति चापीति च तद्वदुपेति च परीति च ब्रूते ॥ ४ ॥

इत्युपसर्गा उक्ता विंशतिरेषां क्वचेतरेऽप्यर्थाः ।
अथ च निपाताः केचिद्दर्श्यन्ते ये त्रिधाऽर्थभेदेन ॥ ५ ॥

उपमायामिव, ननु, चिद्, नेति निषेधेऽपि पूर्वतः पठितः ।
पूजावकुत्सयोश्चिद्धत्वपदेशानुपृष्टयोरपि नु ॥ ६ ॥

अर्थोपसङ्ग्रहार्थाः, समुच्चये चेति आ इति च ।
वेति विचार चार्थे, विनिग्रहे प्रथमवाक्यगावहहौ ॥ ७ ॥

परवाक्यगो विनिग्रह, उ अयं पदपूरणोऽपि स्यात् ।
किल इति विद्यातिशये, न ननुभ्यां संप्रयुक्तमनुपृष्टे॥ ८ ॥

त्विदिति समुच्चयवाची, हीति न्वर्थेऽप्यसूयायाम् ।
मेति निषेधे, खल्विति तत्र च पदपूरणे च स्यात् ॥ ९ ॥

नूनं विचिकित्सायां पदपूर्तौ चाथ शश्वदिति ।
अनुपृष्टे तु पुरस्तादुपरिष्टादस्वयंपृष्टे ॥ १० ॥

सीमिति परिग्रहे पदपूर्तौ चेत्येवमितरेऽपि ।
पदपूरणानि तु विदुः कमिद्‌ईमिति ये च पूर्वनिर्दिष्टाः ॥ ११ ॥

इव ननु चिदु खलु नूनं घ कमित्सीमीमिमानि चान्यानि ।
पदपूरणानि, नेदिति परिभयकेऽथानुपृष्टके तु नचेत् ॥ १२ ॥

आकीं नकीं नकिर्माकिर्हिकमाहिकमाकृतम् ।
नुकं सुकं नवैतानि व्यर्थान्युक्तिप्रपुष्टये ॥ १३ ॥

अन्ते था, वद्, रूप-वर्ण-भूता, नु-न-चिदा-इव ।
यथा, तथा, लाक्षणिका उपमार्था उदाहृताः ॥ १४ ॥

इत्युपसर्गवर्गः

ऐकपदिकवर्गः ७

अथोच्यन्ते पदान्यत्र द्वेशते चाष्टसप्ततिः ।
दमूना मेहना मूषः शिताम जठरं जहा ॥ १ ॥
ईर्मान्तासः कायमानो द्रुपदे विद्रधे निधा ।
शीरं नसन्त नंसन्ते शिप्रे तितउ तुग्वनि ॥ २ ॥
मध्या कुरुतन व्यन्तः परितक्म्याम्नसद् रजः ।
सुविते दयते बाहो मन्दू आहनसो हरः ॥ ३ ॥
इषिरेणोष्मणः काणा अकूपारस्य दावने ।
लोधं वाशी नू च नूचिद्विषुणो मन्दिनेऽदितिः ॥ ४ ॥
शिशीते सुतुको जामिः पिता जसुरिरेरिरे ।
शंयोरप्रायुवोऽस्यास्या गातुस्तूताव दंसयः ॥ ५ ॥
सुभायणा गौश्च्यवनो जरते वियुते ऋधक् ।
चयसे जुहुरे चेति द्वाषष्टिपदसंहतिः (६२) ॥ ६ ॥

---

*

सस्निमन्धो वावशानो वार्यं दूतो वनुष्यति ।
भन्दना आहनः सोमोअत्ताः श्वात्र तरुष्यति ॥ ७ ॥

नद ऊतिर्हासमाने सतं षड्भिर्द्रिता पविः ।
वाहिष्ठो वा वराहोऽकों धन्व वक्षः सचा सिनम् ॥ ८ ॥
पृथुज्रया असश्चन्ती शर्या इत्था चिदाघृणिः ।
द्युम्नं पवित्रमाङ्गूषः काणुका शिपिविष्ट आ ॥ ९ ॥
तोदः स्वञ्चाः श्मशा विष्णुरुर्वशी वयुनं वृकः ।
आपान्तमन्युस्तूर्णाशं गधिता गव्यमारितः ॥ १० ॥
वाजगन्ध्यं वाजपस्त्यं जोषवाकं निचुम्पुणः ।
कौरयाणस्तौरयाणः क्षुम्पं पादुः पदिः परि ॥ ११ ॥
हरयाणोऽप्यह्रयाणो निष्षपी तूतुमाकृषे ।
काकुदं केपयोंऽसत्रं वीरिटे चर्षणिः स्तृणिः ॥ १२ ॥
शम्ब ईं सीमेनमनां समस्याच्छ कुटस्य च ।
अथर्यु मध्रिगुः कृत्तिः श्वघ्नी च स्वसराणि च ॥ १३ ॥
बन्दी चेति पदानि स्युरशीतिश्चतुरुत्तरा (८४) ।

*

आशुशुक्षणि राशाभ्यः सललूकमलातृणः ।
कुणारुं कत्पयं काशिनक्षदाभं सर्वमिनि ॥ १४ ॥

ऋदूदर ऋदूपे किरस्कुधेयुरिसन्वती । ।
पुलुकामो भाऋजीको रुजाना जूर्णिरोमना ॥ १५ ॥
उपलप्रक्षिणी पाथः सप्रथाः कपना कृपा ।
तृवदुक्थं प्रकलविद्वीरुधः शुरुधश्चनः ॥ १६ ॥
शशमानः शाशदानः श्रायन्तः पचताऽग्रिया ।
विदथानि विजामातुरीन्वे चोष्कस्य विलुहः ॥ १७ ॥
अभ्यर्द्धयज्वा दुरितं स्तियानां तुर्वणिः स्तिपाः ।
श्रुष्टी सोमानमोमासोऽमिनोऽमूरः किमीदिने ॥ १८ ॥
स्रप्रः शिप्रे सुशिप्रोऽक्रोऽस्मृतेंस्मृतेऽप्रतिष्कुतः ।
सुविदत्रः सुदत्रोऽम्यग्रू रंसु गिर्वणसेऽमतिः ॥ १९ ॥
आशीरस्मे जारयायि यादृश्मिन्नानुपक् सुमत् ।
तुञ्जोऽमीवाऽमवानप्वा ततनुष्टिमिलीविशः ॥ २० ॥
अंहुरो वकुरोऽसक्रां रुशदुल्वं रिशादसः ।
निश्रुम्भा अनवायं च कियेधाश्च प्रतद्वसू ॥ २१ ॥
गल्दया जल्हवोऽसामि कीकटेषु पराशरः ।
शिरिम्बिठो वेकनाटान् बृंदं बुन्दोऽनवब्रवः ॥ २२ ॥
हिनोतोरारा उपासि दिविष्टिष्वभिधेतन ।
जिन्वत्यजीगः कुलिशोऽनर्शराति क्रिविर्दती ॥ २३ ॥

तुरीपं रास्पिनोऽमत्र ऋजुनीती ऋचीषमः ।
द्विवर्हा वर्हणा चाकन् जरूथं दूत ऋञ्जतिः ॥ २४ ॥
जबार्वनर्वा चोष्कूयमाणश्चोष्कूयते भृमिः ।
वतः पुरन्धिर्वाताप्यं रथर्य्यति करूळति ॥ २५ ॥
सदान्वे जञ्झतीदंयुः शरारुर्दन आधवः ।
विष्पितः स्याद्दवीसं च पदान्येतानि भावय ॥ २६ ॥
शब्दाः सन्दिग्धसंस्काराः संदिग्धार्था अनेकधा ।
विगृहीता निगमतः संगृह्येते प्रदर्शिताः ॥ २७ ॥

इति ऐकपदिकवर्गः ॥ ७ ॥

ऐकपदिकार्थवर्गः ८

एषां पदानां यानर्थान् भावयन्ति विपश्चितः ।
तानपीह प्रवक्ष्यामि यथावदनुपूर्वशः ॥ १ ॥
दमूना इष्यते दान्ते यस्य वाभिरुचिर्गृहे ।
यस्य दान्ते मनस्तस्मिंस्तथा दानमनस्यपि ॥ २ ॥
मेहना महनीयेऽर्थे धनादाविष्यतेऽथवा ।
न गृहेऽस्ति ममेत्यर्थे छन्दोगानां पदत्रयम् ॥ ३ ॥
मूषस्तु मूषिकायां स्युः शिताम गुदमुच्यते ।
केचिद्वदन्त्यपि श्यामे बाह्वोरपि यकृत्यपि ॥ ४ ॥
जठरं तूदरे सिद्धं जघानार्थे जहापदम् ।
ईर्म्मान्ताः पृथुजङ्घत्वात्सूर्य्याश्वाश्चेरितान्तकाः ॥ ५ ॥
यस्तु कामयमानः स्यात्कायमानः स उच्यते ।
कायमानश्चायमान इत्यप्यन्ये प्रचक्षते ॥ ६ ॥
द्रुपदं पादुकायां स्यान्निगडे वा द्रुमाश्रये ।
विद्रधं तु भयातस्थे व्यूढे वा विदृढेऽपि वा ॥ ७ ॥
निधा पाशसमूहे स्याच्छीरोऽग्नावनुशायिनि ।
तथैवाशनशीलेऽपि शीरं केचित्प्रचक्षते ॥ ८ ॥

भवेदभिनमन्त्यर्थे नंसन्ते च नसन्त च ।
शिप्रे हनू नासिके वा चालन्यां तितउः स्मृतः ॥ ९ ॥
तुग्व तीर्थं नदीनां स्यात्स्नातुं यत्रावतीर्य्यते ।
मध्या मध्ये कुरुतनेत्यादिषूपजनोऽस्ति नः ॥ १० ॥
व्यन्तो वीधातुनिर्वृत्तो गतिप्रजननादिषु ।
पश्यत्सु गन्तृष्वक्षत्सु व्यन्त इत्यपि चक्षते ॥ ११ ॥
परितक्म्याऽभितोगन्त्र्यां रात्रौ वा केचिदूहिरे ।
अन्नान्नं तत्र सदनादन्नसत् पाककारिणी ॥ १२ ॥
रजस्तु ज्योतिरब्लोकास्तगहर्वाचकं मतम् ।
सुवितं तु प्रसूते वा प्रजायां वाऽपि सुष्ठुगे ॥ १३ ॥
द.नादानगतित्राणहिंसादाहविभक्तिषु ।
दयते पदमाख्यातं त्राहः सोमेऽपि कथ्यते ॥ १४ ॥
वाहः स्तुतौ चर्म्मणि वा सोमाधिषवणात्मके ।
मन्दू मदिष्णू विख्यातावथवापि मदिष्णुना ॥ १५ ॥
आहनाः स्याद्भक्षनवान् हरस्तु रजसा समम् ।
मनस्त्वपेक्षासंपन्नमि.षिरं प्रणिधीयते ॥ १६ ॥
इषम दृष्टिगतीच्छासु तद्योगादिष्मिणो मताः ।

ऋणा भवन्ति कुर्वाणा अकूपारस्तु कच्छपे ॥ १७॥
आदित्ये च समुद्रे च दावा स्याद्दातृदानयोः ।
लोधं लुब्धेऽथ वाशी स्याद्वाचि च्छेदनसाधने ॥ १८॥
इदानीमपि चेत्यर्थे नू च स्यान्नूचिदित्यपि ।
विषुणो विषमेऽपि स्यान्मन्दीति स्तुतिमत्यपि ॥ १९॥
अदितिर्देवमाता स्यात्प्रकृतिर्भूरखण्डिता ।
शिशीते तु श्यतीत्यर्थे सुतुकः सुप्रजाः सुगः ॥ २०॥
पुनरुक्ते जामिशब्दो भगिन्यादौ च बालिशे ।
पिता तु प्रभुराजन्म जसुरिस्ताडिते तथा ॥ २१॥
बद्धमुक्ते च निहतवेगश्रान्ते बुभुक्षिते ।
एरिरे प्रेरयामासुः शंयुः सुखयुरुच्यते ॥ २२॥
बृहस्पतिसुते रोगशमने भयनाशने ।
अप्रायुवोऽप्रमाद्यन्तोऽप्रगच्छन्तोऽपि वा मताः ॥ २३॥
अस्या अस्येति षष्ठ्यन्तं पदद्वन्द्वमुदात्तवत् ।
आदेशेऽथानुदात्तं स्यादन्वादेशे यदा भवेत् ॥ २४॥
भुण्यध्वनि गतौ गातुस्तूतावववृधे समौ ।
दंसयो दासकर्माणि सन्ति सुप्रायणाः सुगाः ॥ २५॥
तास्तु यज्ञगृहद्वार इति यास्कोऽभिमन्यते ।

अर्चिष: शाकपूणेस्तु मते सुमायणा इति ॥ २६ ॥
रश्मौ सूर्ये बलीवर्दे धेनौ भुवि च वाचि च ।
वज्रेऽम्बुनि शरे स्वर्गे लोम्नि गौरिति पठ्यते ॥ २७ ॥
च्यवनो वा च्यवानो वा भार्गवे स्तोतरि स्मृतः ।
जरते स्तौति वियुते पृथग्भावे ऋधक् पृथक् ॥ २८ ॥
चयसे नाशयस्यर्थे जुहुरे जुह्वरे यथा ।
द्विषष्टिपदजातानामेवमर्था निरूपिताः ॥ २६ ॥

*

सस्निर्मेघेऽपि संस्नातेऽप्यन्धोऽन्नाद्दकूतमः स्वपि ।
प्रथ कामयमाने स्याद्वावशानोऽभिवक्तरि ॥ ३० ॥
वार्य्यं तु वरणीयं स्याद्यदत्यन्तं वरं भवेत् ।
दूतो वृत्तवहे सिद्धः, क्रोधे घाते वनुष्यति ॥ ३१ ॥
वन्दना तु स्तुतौ, क्रूरवाक्यादाहन्तराहनः ।
प्राशिष्टान्तैषमत्तारीदित्यर्थेऽत्ता इतीष्यते ॥ ३२ ॥
मात्रं धने च क्षिप्रे च तरुष्यति जिघांसति ।
नपत्यध्येतरि ऋषौ नद ऊतिस्तु तर्पणे ॥ ३३ ॥
रक्षायां हासमानन्तु स्पर्द्धमाने च हृष्यति ।

सम माध्यमिकं ज्योतिरुच्यतेऽनित्यदर्शनात् ॥ ३४

स्पर्शनैर्बाधनैः पानैः पादैः पड्भिर्द्विता द्विधा ।
पविर्वज्रे वाचि यज्ञे रथचक्रप्रधावपि ॥ ३५

वाहिष्ठोऽत्यधिकं वोढाऽऽह्वाता वाऽत्यधिकं च यः ।
ब्रा व्रात्या वरितारश्च केषांचिदुषसो मते ॥ ३६

वराहोऽभ्रे च भूदारे वराहा अङ्गिरोगणाः ।
ये च माध्यमिका देवगणास्ते तु वराहवः ॥ ३७

प्रजापतिः पुरा वायुर्भूत्वाऽप्सु विचरँस्ततः ।
उज्जहार स एमूषो वराहः पृथवीमिमाम् ॥ ३८

वृत्ते चाग्ने च मन्त्रे च देवे चार्कः प्रतिष्ठितः ।
अन्तरिक्षे तु धन्व स्याद्धन्वा स्यान्मरुदेशके ॥ ३९

भुजयोरन्तरं वक्षः पक्षसी ये द्विदिङ्नते ।
सचा सह सिनं त्वन्नं महावेगः पृथुज्रयाः ॥ ४०

असश्चन्ती न सज्येते न व्युदस्यत एव वा ।
अन्तरेण समानेनान्योन्यमाश्रित एव ये ॥ ४१

इषवोऽङ्गुलयः शर्या इत्था त्वित्थमुभौ समौ ।
या सोमक्रयणी गौः स्यात् तत्र नामैव चित्पदम् ॥ ४

पूजोपमावकुत्सादावनुदात्तं तु चित्पदम् ।

आघृणिस्त्वागतक्रोधे तथैवागतदीप्तिके ॥ ४३ ॥
द्युम्नं धनयशोऽन्नेषु पवित्रं त्वप्सु रश्मिषु ।
मन्त्रेऽप्यग्नौ च वायौ च सोमे सूर्ये मघोनि च ॥ ४४ ॥
अङ्गूषः स्तोम एवेष्टः, काणुका कामुकोऽथवा ।
हतपानाभिलाषो वा काणुका कणशः कृतम् ॥ ४५ ॥
शिपिविष्टपदेनासौ विष्णुः प्रायो विशेष्यते ।
अर्वागर्थे तूपमार्थे चार्थेऽप्यर्थेऽपि आ इति ॥ ४६ ॥
तोदस्तुदो गृहस्थः स्यात् कूपो भूबिलमेव वा ।
स्वञ्चाः सुगमनो योऽर्थो नाडी कुल्या नदी क्रमशः ॥ ४७ ॥
आदित्ये द्वादशे विष्णुर्यज्ञे वा व्यापकेऽपि वा ।
उर्वश्यप्सरसि प्रज्ञाकान्त्योस्तु वयुनं भवेत् ॥ ४८ ॥
वृकस्तु चन्द्र आदित्यः श्वा वज्रोऽथ वृकी शिवा ।
आपान्तमन्युः सोमे स्यादिन्द्रे वा मन्युयोगतः ॥ ४९ ॥
तूर्णाशं शीघ्रसंव्यापि शीघ्रभक्ष्यथवोदकम् ।
गाढमङ्गैः परिष्वक्ता गधिता परिकीर्तिता ॥ ५० ॥
गध्यं तु ग्रहणीयेऽर्थे सोमे भूयः प्रयुज्यते ।
स्तोमं प्रति गतो यज्ञं प्रति वा गत आरितः ॥ ५१ ॥

धाजपस्त्यो वाजगन्ध्यः सोमे ह्यन्नविशेषित ।
जोषवाकमविस्पष्टवचनं अन्यवागपि ॥ ५२ ॥
निचुम्पुणपदेनासौ सोमः प्रायो विशेष्यते ।
निचुम्पुणः समुद्रोऽपि वरुणोऽवभृथोऽपि च ॥ ५३ ॥
कृतयात्रे कौरयाणस्तौरयाणस्तु शीघ्रगे ।
क्षुम्पं त्वहिच्छत्रकं स्यात् क्षुभ्यते यद्यत्नतः ॥ ५४ ॥
पादुः पादतलासक्तचर्म्मकाष्ठादिके गमे ।
पदिः पक्षी, परीत्येतत् सर्वतोभाव इष्यते ॥ ५५ ॥
भागवीप्सालक्षणेत्थंभूताख्यानेषु वर्जने ।
हरयाणो नित्यकालमभिप्रस्थितयानके ॥ ५६ ॥
प्राणैश्वर्यादिहरणप्रयाणे वापि गद्यते ।
अह्रयाणो वदान्यत्वादलज्जितगतिर्मतः ॥ ५७ ॥
निष्षपी स्त्रीरतो यस्य शेपो नित्योद्धतः स्त्रियै ।
तूतुमाकृष इत्येतत्तूर्णमाकुरुषेऽपि वा ॥ ५८ ॥
त्वरया कुरुषे वापि काकुदं तालु कथ्यते ।
केपयस्तु कपूयाः स्युर्ये हि दुष्कर्म्म कुर्वते ॥ ५६ ॥
अंसत्रं कवचं वा स्याद्धनुर्वाऽप्यथ वीरिटे ।
शून्यस्थानेऽन्तरिक्षे वा समवायेऽपि वा नृणाम् ॥ ६० ॥

चर्षणिस्तु जनो द्रष्टा सृणिर्दात्रेऽङ्कुशेऽपि च ।
शम्बो वज्रेऽथ निर्दिशेऽपीदमर्थेऽपि वेमिति ॥ ६१ ॥
सीम् स्यात् सीमान इत्यर्थे व्यर्थं वा पदपूरणम् ।
एनामेनं द्वितीयान्तं पदद्वन्दमुदात्तवत् ॥ ६२ ॥
आदेशेऽथानुदात्तं स्यादन्वादेशे यदा भवेत् ।
सम: सर्वोऽच्छशब्दस्याभिमुख्ये वृत्तिरिष्यते ॥ ६३ ॥
अथवा प्राप्तुमित्यर्थो मन्यते शाकपूणिना ।
कुटः कृतेऽथ्वर्युरिति वह्नौ गमनशालिनि ॥ ६४ ॥
अथेर्य्यवो बाहवः स्युरथर्य्योऽङ्गुलयः स्त्रियः ।
अध्रिगुस्त्वाग्निरिन्द्रश्च यस्याप्रतिहता गतिः ॥ ६५ ॥
मन्त्रोऽप्यध्रिगुरुद्दिष्टः कृत्तिरन्नं यशोऽपि च ।
कृत्तिश्चर्ममयं वस्त्रं कन्था सूत्रमयी तथा ॥ ६६ ॥
श्वघ्नी स्यात् कितवोऽहानि स्वसराणि भवन्ति हि ।
ब्रन्दी तु मृदुलो वा स्यान्मार्दवापादकोऽपि वा ॥ ६७ ॥
इत्यर्थाश्चतुराशीतिपदानामूहिता बुधैः ।

*

आशुशुक्षणिरग्निः स्यादाशास्तूपदिशो दिशः ।
सलल्कं तुतदूरक्षः संलुब्धं पापकं च यत् ॥ ६८ ॥
संमूढं प्रच्युतं स्थानादथवाऽप्यपसारि यत् ।
अलमातर्दनो योऽर्थः स मेघः स्यादलातृणः ॥ ६९ ॥
अलातृणः कुणारुश्च कियेधाश्च शिरिम्बिठः ।
इलीविशः कत्पयं च षड्भिर्मेघो विशिष्यते ॥ ७० ॥
कुणारुः क्वणनस्तद्वत् कत्पयः स्यात् सुखोदकः ।
नक्षदाभमभिव्याप्य हन्तारं विद्धि वज्रिणम् ॥ ७१ ॥
काशिर्मुष्टिः सखीमेति स्यादनुज्ञार्थकं पदम् ।
मृदूदरस्तु यः सोमः स एव स्याद्दूदरः ॥ ७२ ॥
अर्दनात्पालकौ बाहू ऋदूपे भवतोऽथवा ।
ऋदुशब्दो मर्मवाची बाहू स्तो मर्मपालकौ ॥ ७३ ॥
किः कर्ता, यस्तु दीर्घायुः सोऽस्कृधोयुः कृधुर्लघुः ।
हनू असंखादन्त्यौ चेत् कथ्येते आसिन्वती ॥ ७४ ॥
प्रसिद्धदीप्तिमत्त्वा तु भाऋजीकोऽग्निरुच्यते ।
पुलुकामस्तु बह्विच्छो रुजाना नद्य ईरिताः ॥ ७५ ॥
जूर्णिर्हेतिश्चमूः क्रोध ओमना त्ववनेन वा ।
उपलप्रक्षिणी धान्यभर्जनी सक्तुकारिका ॥ ७६ ॥

पाथोऽन्तरिक्षमापोऽन्नं सप्रथाः सर्वतः पृथुः ।
कपनाः कृमयो, देवाच्या कृपेति पदे युजौ ॥ ७७ ॥
देवान् प्रत्यक्तया तद्वत् कल्पयेत्यर्थमाहतुः ।
वृत्रदुक्थो महोक्थः स्याद्यस्मै वोक्थं प्रयुज्यते ॥ ७८ ॥
वणिक् प्रकलविद् यो हि गणितं वेत्ति तत्त्वतः ।
ओषध्यो वीरुधोऽथापः शुरुधोऽन्नं चनः स्मृतम् ॥ ७९ ॥
शशमानः शंसमानः शाशदानस्तु यो मुहुः ।
अत्यन्तं वा शातयति श्रायन्तस्तु समाश्रिताः ॥ ८० ॥
समाश्रयन्तः श्रायन्तः, पक्वस्तु पचता समौ ।
अग्रिया तु भवेदग्र्या ऽग्रगत्याप्यग्र एव वा ॥ ८१ ॥
विज्ञानानि च यज्ञाश्च विदथानि प्रचक्षते ।
विजामाता न यत्रास्ति जामातुः सर्वलक्षणम् ॥ ८२ ॥
ईक्षे तथेशिषे तुल्यौ क्षोणा निवसिता भवेत् ।
क्षोणं निवासस्थानं स्याद् भवन्त्यापस्तु विस्रुहः ॥ ८३ ॥
अभ्यर्द्धयज्वा पूषा स्मान्मरुद्भ्योऽभ्यर्धयन् रसान् ।
भूतानि चाभिमुख्येन वृद्ध्या योजयतीह सः ॥ ८४ ॥
दुरितं दुर्गतिकरं स्रितया आपोऽतिसंहृताः ।

शीघ्रं सम्भाजको योऽर्थः स तुर्वणिरुदाहृतः ॥ ८५ ॥
स्तिपा अग्निर्हिमात् पाति कूपो वा पात्युपस्थितान् ।
श्रुष्टी क्षिप्रं सुखं धान्यशलाकाप्यभिधीयते ॥ ८६ ॥
सोमानमभिषोतारमोमासो रक्षकास्तथा ।
तर्पकास्तर्पणीयाश्च सोऽमिनो यो ह्यहिंसितः ॥ ८७ ॥
अमिनोऽमितमात्रश्चानन्तकालोऽपि वामिनः ।
अमूर इत्यमूढः स्यात् किमीदी पिशुनो मतः ॥ ८८ ॥
सृमः सर्पोऽथ सर्पिर्वा तैलं वा सर्पणाद् भवेत् ।
शिप्रे हनू नासिके वा सुशिप्रो यस्य ते शुभे ॥ ८९ ॥
अक्रः प्राकार इत्युक्तो यदाक्रामति सोऽम्बरम् ।
सूर्ते सुविस्तृते व्योमन्यसूर्ते वायुविस्तृते ॥ ९० ॥
यस्त्वप्रत्यागतो युद्धेऽन्येनाप्रतिगतोऽपि वा ।
योऽप्रतिस्खलितः पूर्वमन्याप्रातिहतोऽपि वा ॥ ९१ ॥
पराङ्मुखः कृतो नो यः स च स्यादप्रतिष्कुतः ।
सुविदत्रः सुविद्यः स्यात् सुदत्रस्तु सुदातरि ॥ ९२ ॥
अभ्यक् त्वसम्यगेव स्यादृक्षृष्टिर्वाभिगता रिपून् ।
सहभूतापि वा सा स्याद् रमणीयेषु रंसिवति ॥ ९३ ॥

गिर्वणाः स्तुतिसंभक्ताः शक्रो गीर्वाण एव वा ।
सूर्य्यस्येव स्वतो भूतः प्रकाशोऽमतिरुच्यते ॥ ६४ ॥
आशीः सान्ता शुभाशास्ति रान्ता त्वाशिरमाह च ।
आशिरं दधि मन्यन्ते दध्यर्थं पय एव वा ॥ ६५ ॥
अस्मदः सर्वलिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु वृत्तमस्मे इदं पदम् ॥ ६६ ॥
जारयायीति चाख्यातमजनीत्यर्थ इष्यते ।
तमीजरायिता गन्ता चोस्नः स्याज्जारयायि वा ॥ ६७ ॥
यादृस्मिन् यादृशेऽथानुपूर्व्यमेवानुषक् स्मृतम् ।
उपर्य्युपरिसंलग्नमनुषक्तं तदानुषक् ॥ ६८ ॥
सुमत् स्वयमथो तुञ्जः कथितो दानवज्रयोः ।
अमीवा गर्भविध्वंसी कृमिर्वा रोग एव वा ॥ ६९ ॥
अमात्यवान् यत्नवान् वा रोगभूतोऽपि वाऽमवान् ।
अप्वा व्याधिर्भयं वापि मेघस्तु स्यादिलीविशः ॥१००॥
ततनुष्टिस्तु विषयोपभोगैकक्रियापरः ।
अंहूरणोऽन्धकूपः स्यादंहस्वानथवांहुरः ॥ १०१ ॥
वकुरो भास्करो दीप्तो ज्योतिर्हेतिर्भयंकरः ।
स भास्वद्द्राविणो वापि रुशद्वर्णस्तु रोचनः ॥ १०२ ॥

असक्रा त्वनपाया स्याद्यथासाधारणी च सा ।
उल्वं जरायोरप्यन्तर्गर्भवेष्टनमुच्यते ॥ १०३ ॥
येनाशयन्ति हिंसन्तं ते कथ्यन्ते रिशादसः ।
अविश्लथमविश्रान्तं शीघ्रं वापि हरन्ति ये ॥ १०४ ॥
तेऽश्वानिश्रृम्भाः कथ्यन्तेऽनवायं त्ववियोजनम् ।
निःशेषं चानवायं स्यात् क्रियेधा इन्द्रमेघयोः ॥ १०५ ॥
माप्तौ धाना ऋजीषं च ताविन्द्राश्वौ प्रतद्वसू ।
स्यादागल्दापि गल्दापि नाडी गलितधारिणी ॥ १०६ ॥
जह्लवेऽग्निविहीनः स्यादसमाप्तमसामि च ।
कीकटा असदाचारास्तद्देशाः कृपणा अपि ॥ १०७ ॥
ऋपिः कृपिः पराभूतिकर्तेन्द्रश्च पराशरः ।
शिरिम्बिठस्तु मेघः स्याद् भारद्वाजः शिरिम्बिठः ॥ १०८ ॥
वेकनाटा वार्दुषिका वृन्दं जनसमूहके ।
इषुर्बुन्दोऽशनिर्बुन्दो हिनोत हिनुतेतिवत् ॥ १०९ ॥
यस्त्वप्रतिहताज्ञः स्यात् कथ्यते सोऽनवब्रवः ।
उराणो बहु कुर्वाण उपस्थे तूपसीति च ॥ ११० ॥
दिविष्टयो दिव्यगतिप्रसाधिन्यः क्रिया मताः ।
अभियेतनशब्दस्य भाषायामभिधावत ॥ १११ ॥

जिन्वन्ति प्रीणयन्तीति कुलिशं वज्रमुच्यते ।
अजीगरिति चागारी रतिस गृह्णासि वा तथा ॥ १२१ ॥
अनश्लीलप्रदाता योऽनर्शरातिः स उच्यते ।
अनश्लीलप्रदानं वानर्शरातिरुदाहृता ॥ १३१ ॥
क्रिविर्दती शतघ्नी स्यात् तुरीपमुदकं मतम् ।
रास्पिनः शब्दवन्नीरं तद्वान्मेघोऽपि रास्पिनः ॥ ११४ ॥
उच्चार्यमाणस्तोत्रेण स्तोता वा रास्पिनः स्मृतः ।
अमत्रोऽपरिमाणः स्यात् स च योऽनभिहिंसितः ॥ ११५
ऋजुनीती त्ववक्राध्वनेतारौ साधुसंविदौ ।
यथेच्छस्तूयमानार्थगुणशाली त्वृचीषमः ॥ ११६ ॥
द्विबर्हा वर्द्धमानो यो द्वयोरपि दिवोः समम् ।
हिंसा वृद्धिः परिवृढो वर्हणा परिवर्हणा ॥ ११७ ॥
चायन् कामयमानो वा चाकन् कामयतेऽपि वा ।
स्तोत्रं जरूथं दूतस्तु वृत्तवाह्यथ ऋञ्जतिः ॥ ११८ ॥
आत्मसात्करणे धातुः स समीकरणेऽपि च ।
जवारु मण्डलं भानोरनर्वाऽन्यसमाश्रितः ॥ ११९ ॥
चोष्कूयमाणस्तु भृशं व्युदस्यन् गा भृशं ददत् ।
चोष्कूयते भृशं दत्ते व्युदस्यत्यथवा भृशम् ॥ १२० ॥

भ्रमिता वा भ्रमयिता भूमिराग्निर्विशेष्यते ।
वतस्तु दुर्बलोऽर्थः स्य द वत खेदानुकम्पयोः ॥ १२१ ॥
बहुकर्मा बहुप्रज्ञः पुरन्धिः स्यात् पुरन्दरः ।
वरुणोऽपि पुरन्धिः स्याद् वाताप्यं वर्षणोदकम् ॥१२२॥
रथं वा रंहणं वापि यादिच्छति रथर्यति ।
कृत्तदन्ततया देवः पूषा प्रोक्तः करूडती ॥ १२३ ॥
स्यादलक्ष्मीः सदान्वेति दुर्भिक्षस्यापि देवता ।
जज्झतीरीदृशं शब्दं कुर्वाणा आप एव च ॥ १२४ ॥
इदं कामयमानो यः स इंदयुरुदाहृतः ।
वस्नयुर्विभयुः शंयुः किंयुरित्यादयस्तथा ॥ १२५ ॥
शरारुः संशिशरिषुर्विद्धि दानपरान् दनः ।
आकम्पनस्त्वाधवः स्याद् विप्राप्तत्वात्तु विष्पितः ॥१२६॥
इतश्चेतश्च विस्तीर्णो विप्राप्त इति कथ्यते ।
अवीसं पृथिवीमाहुर्नैगमार्थविशारदाः ॥ १२७ ॥
इतीत्थमर्था आख्याता यास्कव्याख्यानुसारतः ।
द्वात्रिंशशतसंख्यानां पदानामपि पूर्ववत् ॥ १२८ ॥

*

शब्दसारूप्यसम्बन्धादर्थबोधाविरोधतः
प्राचीनैरूहिता अर्थाः सर्व एवात्र दर्शिताः ॥ १२६ ॥
अदूध्येया नैव ते सर्वे प्रादेशिकतया कृताः ।
अनैकान्त्यात् प्रदेशस्य मण्डलीमण्डपादिषु ॥ १३० ॥

पदजात्याऽभिधेयेन संस्कारेण स्वरेण वा ।
गुणेन वा विभागेन विक्षेपेण क्रमेण वा ॥ १३१ ॥
अध्याहारेण वा तद्वद् व्यवधानादितोऽपि वा ।
यानि यानि पदान्यत्र निर्धार्यन्ते न तत्त्वतः ॥१३२॥
यानि वा परिदृष्टानि बहुष्वर्थेषु कानिचित् ।
तेषां कृतो विमर्शाय पदानामेव संग्रहः ॥ १३३ ॥

स्वेति नाम निपातो वा पदं जात्या न निश्चितम् ।
शितामेति गुदं शाकपूणेर्यास्कस्य दोः पशोः ॥ १३४ ॥
तैटिकेस्तु यकृच्छ्यामं तस्माद्वाक्यं न निश्चितम् ।
ईर्म्मान्तास ऋषीसं च संस्कारे नावधार्यते ॥ १३५ ॥

"वने न वायो"-* इत्यत्र स्वरान्नावगतं पदम् ।
प्रदेशतोऽनवगतं "करूडइत्यादिकं पदम्" ॥ १३६ ॥
मेहनेत्यत्र न ज्ञातो विभागोऽस्ति विरोधतः ।
तत्रैकपद्यं शाकल्यो मेने गार्ग्यः पदत्रयम् ॥ १३७ ॥
द्यावा नः पृथिवीत्येतद्विक्षेपानवधारितम् * ।
क्रमस्तूपरमध्वं म-इत्यादौ नावगम्यते * ॥ १३८ ॥

---

* वने न वायो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥
ऋ० सं० ७ । ७ । २२ । १ ऐ० आ० ५ । ३

अत्र वेति य इति पदद्वयं शाकल्यो मेने । किन्तु पदद्वयसत्त्वे यद्वृत्तात्परस्य न्यधायीत्याख्यातस्योदात्तत्वमभविष्यत् । दृश्यते तु निघातः। तस्माद् - वाय-इत्येकमेव पदम् ।

* द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् । ऋ० २ । ८ । १० । ५

* रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्त्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषाऽवस्युरह्वे कुशिकस्य सूनुः ॥
ऋ० ३ । २ । १२ । ५ ।

का क्रिया "दानमनसो नो मनुष्यान्" इति स्थले ।
वायुर्नियुत्वान्—*इत्येतद् व्यवधानान्न निश्चितम् ॥१३९॥
इत्थं दशानवगमाः शब्दा एते प्रदर्शिताः ।
ततोऽन्यथापि बहुधा दृश्यते सङ्करक्रमः ॥ १४० ॥
तत्र तत्र प्रकरणे यादृगर्थोऽवभासते ।
तथा तथार्थं कल्पन्ते मतिभेदात् पृथक् पृथक् ॥ १४१ ॥
इत्थमेवेति नाद्यापि तेऽर्थाः शक्याः प्रकल्पितुम् ।
अन्योऽप्यर्थो भवेदेषां प्रज्ञया संप्रधारितः ॥ १४२ ॥
कानिचित्तु पदान्यत्र बह्वर्थानि भवन्ति हि ।
रजोहरःसदृत्त्वाणि तेषां पाठः प्रसङ्गतः ॥ १४३ ॥

इति ऐकपदिकार्थवर्गः । ८

---

* प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तो रुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ।
ऋ० सं० ५ । ४ । ६ । २ ।

स्तृभिर्ऋक्षा च नक्षत्रे, तथाऽल्पे दभ्रमर्भकम् ।
मेना ग्नाः स्त्रीष्वया एनाऽन्वक्षनिर्देशकर्म्मणि ॥ १ ॥

अभिके च प्रपित्वे चासन्ने, प्राप्ते तिरः सतः ।
स्यातामावपने शब्दावूर्दरं कृदरं तथा ॥ २ ॥

रम्भः पिनाकं दण्डे स्याद्, वम्रीभिरुपजिह्विका ।
सीमिकास्तु, प्रजनने शेपः स्याद् वैतसोऽपि च ॥ ३ ॥

अर्द्धे त्वनेमौ, सचते सिषक्तु च निषेवणे ।
भयवेपनयोः स्यातां भ्यसते रेजतेऽपि च ॥ ४ ॥

इति द्विपदैकार्थसंग्रहः ८

स्वर्गौः पृश्निर्नभो नाको विष्टप् चेति पदानि षट् ।
समानि दिवि चादित्ये साधर्म्यात् परिचक्षते ॥ १ ॥

खेदा तु किरणा गावो रश्मयोऽभीशवस्तथा ।
आदित्यरश्मिवत् प्रोक्ता एते पञ्चाश्वरश्मिषु ॥ २ ॥

अद्रिर्गोत्रो गिरिर्ग्रावा पर्वतोऽश्मा ब्रजो बलः ।
रौहिणो रैवतोऽप्यश्नो वराहः शम्बरुश्चरुः ॥ ३ ॥

पर्शानः * पुरुभोजाश्च फलिगश्चोपरोपलौ ।
शैलेऽपि मेघवत् प्रोक्ताः शब्दा एकोनविंशतिः ॥ ४ ॥

इति द्व्यर्थसाधारणपदानि ६

---

* वलिशानः इत्यपि शब्दपाठः ।

अनेकार्थवर्गः ६

अ

अथादित्ये समुद्रे चाकूपारः कच्छपेऽपि च ।
अक्षरं वाचि तु क्लीवेऽक्षये त्रिषु तथोदके ।
यज्ञेऽध्वरोऽध्वरं व्योमन्यपस्तूदककर्म्मणोः ॥ १ ॥
अप्नस्तु पदनाम स्याद्रूपेऽपत्ये च कर्म्मणि ।
अभ्वो महति पुंसि स्यादभ्वं तूदकमेघयोः ॥ २ ॥
अमतिः पदनाम स्याद्रूपेऽप्यमतिरुच्यते ।
अम्बरं त्वन्तकव्योम्नोरर्को वज्रान्नयोः पदम् ॥ ३ ॥
ह्रस्वेऽर्भकोऽर्भकं तु स्यादुत्तराणि पदान्यधि ।
पृथिव्यामवनिर्नद्यङ्गुलिष्ववनयः पृथक् ॥ ४ ॥
अश्वः पदं च मेघे च पदमघ्न्या तथा गवि ।
नदीषु च जले चार्णाः द्विरग्निः पदनामसु ॥ ५ ॥
अजिरं चाजिराश्चेति क्रमात् क्षिप्रे नदीष्वपि ।
अदितिः पदनाम द्विः पृथिव्यां गवि वाचि च ॥ ६ ॥
द्यावाभूम्योरेकयोक्त्याऽप्यदिती इति चक्षते ।

अहिः पदं जले मेघे द्यावाभूम्योस्तु गव्यही ॥ ७ ॥
अभीके इति सङ्ग्रामे चोत्तराणि पदान्यधि ।
अभीशवः पदं रश्म्यङ्गुलिषु द्वित्वतो भुजे ॥ ८ ॥
नद्यङ्गुलिष्वग्रुवस्युर्मह्त्यद्भुतमद्भुतः ।
पुंसि क्लीवे चोदकेऽम्बवर्जुनं रूपेऽर्जुनीत्युषाः ॥ ६ ॥
अश्वेऽरुषोऽरुषं रूपे उषासि त्वरुषी भवेत् ।
उषस्येव त्वरुषी स्याद्धिरण्ये चोदकेऽमृतम् ॥ १० ॥

आ

आपस्तु पदनाम स्यादन्तरिक्षे तथोदके ।
आशुरश्वे त्रिषु क्षिप्रे आके अन्तिकदूरयोः ॥ ११ ॥

इ

वागन्नपृथिवीगोषु स्यादिला पदनाम च ।
इत्था पदं च सत्ये चेन्दुर्यज्ञोदकयोः पदम् ॥ १२ ॥

ई—उ

ई जले च पदं च स्यात्, पदनाम द्विरुर्वशी ।

दिव्यूपराः पुमान् मेघे, गव्युस्रोस्रास्तु रश्मयः ॥ १३ ॥
उषाः पदं द्विरुर्वी तु द्यावाभूम्योस्तथा भुवि ।

ऋ

ऋतः पदमृतं सत्ये धने स्यादुदकेऽपि च ॥ १४ ॥

ओ–क

उदकेऽपि बलेऽप्योज उदकेऽपि सुखेऽपि कम् ।
क्षद्म इत्यन्न एव स्यात् क्षद्म स्यादुदकान्नयोः ॥ १५ ॥
उदकेऽपि धने क्षत्रं कशा वाच्युदके कशः ।
क्षपा जल क्षपा रात्रौ क्षितिर्भूः क्षितयो नराः ॥ १६ ॥
वज्रे पदं च कुलिशः कृत्तिर्गेहे पदं तथा ।
कृदरं तूत्तरपदं कृदरः स्याद्गृहार्थकः ॥ १७ ॥

ग–घ

बाह्वोर्गभस्ती भूम्नि स्याद्रश्मिष्वप्यङ्गुलिष्वपि ।
भारमुदके क्लीवे गंभीरा महति त्रिषु ॥ १८ ॥

गंभीरा वाचि गंभीरे द्यावाभूम्योर्गभीरवत् ।
गयो गृहधनापत्ये गातुर्भूमौ पदं तथा ॥ १९ ॥
गोत्रो मेघो मही गोत्रा गौः पदं द्विरुदीरितम् ।
गौः स्तोता वाक्पृथिव्योर्गौः गौः साधारणनाम च॥ २० ॥
गौरी वाचि पदं च स्याद् घर्म्मयज्ञे दिने पुमान् ।
घृणिर्दिने घृणिः क्रोधे ज्वलद्भस्तु तथा घृणिः ॥ २१ ॥

च–ज

चर्षणिः पदनाम स्याद्भूम्नि चर्षणयो जनाः ।
पुनरुक्ते जामिशब्दो भगिन्यादौ च बालिशे ॥ २२ ॥
सुखे जले जलाषं स्याज्जूर्णिः क्रोधे च सत्वरे ।
जूर्णिः पदं सत्वरे तु जूर्णीरित्यपि दृश्यते ॥ २३ ॥

त

त्वष्टा पदं त्रिरुद्दिष्टं तार्क्ष्योऽश्वः पदनाम च ।
यज्ञाकाशवरिष्ठाग्निवाचकस्तुग्र इष्यते ॥ २४ ॥
तुञ्जः पदं च वज्रे च तुर्वशस्तुर्वशेऽन्तिके ।

तुर्वशास्तु मनुष्याः स्युस्तूयं क्षिप्रे तथोदके ॥ २५ ॥
तेजो जले ज्वलत्यर्थे तोयं क्षिप्रे तथोदके ।

द

अश्वनाम दधिक्रेति दधिक्राः पदनाम च ॥ २६ ॥
दभ्रं परपदं ह्रस्वे द्रविणं तु धने बले ।
दिधीतयो दीधितयोऽप्यङ्गुलिष्वपि रश्मिषु ॥ २७ ॥
द्युम्नं पदं धनेऽपि स्याद् दूतो द्विः पदमुच्यते ।

ध—न—प

अन्तरिक्षे पदं धन्व धीः प्रज्ञायां च कर्म्मणि ॥ २८ ॥
धेनुः पदं वाच्यपि स्यान्नदः स्तोतरि वा पदम् ।
नद्यः पदं च नद्यां च नभः साधारणं जले ॥ २९ ॥
वज्रान्नयोर्नमःशब्दो नरोऽश्वे च मनुष्यके ।
नराशंसः पदं द्विः स्यान्नृम्णं तु स्याद्धने बले ॥ ३० ॥
नेमः परपदं चान्ने, पयोऽन्नजलरात्रिषु ।
पयो ज्वलद्ध्रस्वापि स्यात्पदं यज्ञः प्रजापतिः ॥ ३१ ॥

पविः पदं वज्रवाचोः स्यादन्नोदकयोः पयः ।
जले पदं पवित्रं स्यात्पाजस्त्वन्ने बलेऽपि च ॥ ३२ ॥
द्यावाभूमी पुरन्धी स्यात्पुरन्धिः पदनाम च ।
पूषा पदं पृथिव्यां च पृतना मानुषे रणे ॥ ३३ ॥
अन्तरिक्षे तु पृथिवी पदनाम च तान्त्रिधा ।
द्यावाभूमी च भूः पृथ्वी पेशो रूपहिरण्ययोः ॥ ३४ ॥

ब

अश्वे महति च ब्रध्नो ब्रह्म त्वन्ने धने जले ।
उदके चान्तरिक्षे च बर्हिः स्यात्पदनाम च ॥ ३५ ॥

भ—म—य

भगः पदं धनेऽपि स्याद्भूर्भूमौ चान्तरिक्षके ।
सुखे जले भेषजं स्यान्मन्युः क्रोधे पदं तथा ॥ ३६ ॥
मेधाविषु मनुष्याः स्युर्मनुष्या मनुजेष्वपि ।
मरुद्धिरण्ये रूपे च ऋत्विक्षु मरुतः पदम् ॥ ३७ ॥
महोमहद्दिमौ शब्दौ महत्यप्युदकेऽपि च ।

गोवाग्धरित्रीषु मही द्यावाभूमी तथा मही ॥ ३८ ॥
यज्ञमेधाविनोर्मेधो मेधा तु धनमुच्यते ।
परं पदं वाक् च मेना द्विरुद्दिष्टं पदं यमः ॥ ३९ ॥
यशो धनोदकान्नेषु योनिः स्यादुदके गृहे ।

र

रजः पदं रजो रात्री रयिस्तु स्याद्धने जले ॥ ४० ॥
रसो वागुदकान्नेषु रुजानास्तु पदं नदी ।
रुद्रः पदं स्तोतरि च द्युभुवौ रोदसी पदम् ॥ ४१ ॥
रोहितोऽग्ने रोहितश्चाङ्गुलिष्वपि नदीष्वपि ।

व

वधो बले च वज्रे च वनं रश्मिषु चोदके ॥ ४२ ॥
वयुनं पदनाम स्यात् प्रशस्यप्रज्ञयोरपि ।
वराहस्तु पदं मेघे वरुणो द्विः पदं मतम् ॥ ४३ ॥
वसवो रश्मिषु पदं वसु रात्रौ धनेऽपि च ।
वाक्पदं वाक् च भाषायां मेधाव्यृत्विक्षु वाघतः ॥४४॥

वाज्यश्वे समरे वाजे वाजस्त्वन्ने बलेऽपि च ।
वाशी वाचि पदं च स्याद् विधाता पण्डिते पदम् ॥ ४५ ॥
विपो विदुष्वङ्गुलिषु द्विस्तु विश्वानरः पदम् ।
विष्णुर्यज्ञे द्विः पदञ्च, स्तेने वज्रे पदं वृकः ॥ ४६ ॥
वृत्रो मेघे धने वृत्रं, वेनो विद्यज्ञयोः पदम ।
व्योमान्तरिक्षेऽप्युदके व्योमा तु दिशि दिश्यते ॥ ४७ ॥

श

शची प्रज्ञाकर्म्मवाक्तु शर्म्म तु स्यात्सुखे गृहे ।
मेघे तु शम्बरः पुंसि शम्बरं तूदके बले ॥ ४८ ॥
शर्य्यापदं चाङ्गुलिषु श्रवस्त्वन्ने धनेऽपि च ।
शवो धने बलेऽपि स्यात् श्वात्रं तु स्याद्धने पदम् ॥ ४९ ॥
शिप्रे द्विः पदनाम स्यात्, शिल्पं रूपे च कर्म्मणि ।
शूषं बले सुखेऽपि स्यात् श्येनासोऽश्वे पदं त्वपि ॥ ५० ॥

स—ह

सद्मोदके सद्म गृहे सद्म स्यात्समरेऽपि च ।

पदं तु सप्त ऋषयो रश्मिष्वपि तथोच्यते ॥ ५१ ॥
अन्तरिक्षे समुद्रः स्यात्समुद्रः पदनाम च ।
सरो वाच्युदकेऽप्येवं पदं वाक् च सरस्वती ॥ ५२ ॥
सलिलं बहु नाम स्यात्सलिलं जलनाम च ।
स्वः साधारणनाम स्यात्तथा स्वरुदकेऽपि च ॥ ५३ ॥
यज्ञाहःसूर्य्यदेवानां वाचकं स्वःपदं मतम् ।
सविता पदमुक्तं द्रिः स्वधा त्वन्ने तथोदके ॥ ५४ ॥
स्वधे द्यावापृथिव्यौ स्तः स्वसराणि गृहेऽहनि ।
स्वसराणि पदं च स्यात्सस्यमन्ने पदं तथा ॥ ५५ ॥
सहो बले जलेऽपि स्यात्साध्या रश्मिषु वा पदम् ।
सिनमन्ने पदं च स्यात्सुपर्णः पदमुच्यते ॥ ५६ ॥
सुपर्णा वाक् सुपर्णाः स्युरश्वेष्वपि च रश्मिषु ।
सूर्या वाचि पदं क्रोधज्वलतोस्तु हरःपदम् ॥ ५७ ॥
आहुः परे हरःशब्दं ज्योतिर्लोकोदकेषु च ।
हरितोऽङ्गुलयो नद्यो दिशश्चादित्यवाहनम् ॥ ५८ ॥
हविःपदं जलेऽपि स्याद् हेमोदकहिरण्ययोः ।
हिरण्योदकयोर्हेमा होत्रा यज्ञे च वाचि च ॥ ५९ ॥

अनेकार्था इमे शब्दाः पूर्वमत्र प्रदर्शिताः
प्रागुक्ता एव नानार्थे दर्श्यन्ते केऽपि धातवः ॥ ६० ॥

—*—

अर्दति स्याद्वधे गत्यां व्याप्तिगत्योस्तु इन्वति ।
इरज्यतीति धातुस्तु ऐश्वर्यपरिचर्ययोः ॥ १ ॥
ऋच्छः परीचारगत्योर्वधगत्योर्ऋणत्ति च ।
जरते पदमर्चायां जिन्वतीति पदं गतौ ॥ २ ॥
दभ्नोत्यपि वधेगत्यां धमत्यर्चावधे गतौ ।
ध्रुवत्यपि वधे गत्यां व्याप्तिगत्योस्तु नक्षति ॥ ३ ॥
भन्दते भन्दतीति द्वौ ज्वलने पूजने क्रमात् ।
मन्दते ज्वलनेऽर्चायां मन्यते कान्तिपूजयोः ॥ ४ ॥
मर्दत्यपि वधे गत्यां मिनात्यपि वधे गतौ ।
मिनोत्यपि वधे गत्यां रथर्यति गतौ पदम् ॥ ५ ॥
राति दाने गतौ च स्याद्राजत्यैश्वर्यपूजयोः ।
वनुष्यति पदं क्रोधे वेति गत्यात्तिकान्तिषु ॥ ६ ॥
वेनत्यर्चागतीच्छासु परिचारे गतौ शवेः ।
सपत्यर्चापरीचारे स्त्रपित्यर्चननिद्रयोः ॥ ७ ॥

स्वरतीत्यर्चने गत्यां कान्तिगत्योस्तु हर्य्यति ।
ह्वयत्यर्चाभोजनयोरित्यनेकार्थधातवः ॥ ८ ॥
यजुर्वेदार्थयथार्थविज्ञानाय कृतश्रमः ।
मधुसूदनशर्म्मेमां मणिमालां विनिर्म्ममे ॥ ९ ॥
सरस्वत्याः करे सेयं निघण्टुमणिमालिका ।
समर्प्यते मैथिलश्रीमधुसूदनशर्म्मणा ॥ १० ॥

इत्यनेकार्थवर्गः ॥ ९ ॥

बृहद्देवतावर्गः १०

अथ केचित्प्रदर्श्यन्ते शौनकोक्ता यथायथम् ।
देवताविषयश्लोका दैवतज्ञानसिद्धये ॥ १ ॥
भवद्भूतं भविष्यच्च जङ्गमं स्थावरञ्च यत् ।
अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः ॥ २ ॥
असतश्च सतश्चैव योनिरेषा प्रजापतिः ।
यदक्षरञ्च वाच्यञ्च यच्चैतद् ब्रह्म शाश्वतम् ॥ ३ ॥
कृत्वैष हि त्रिधात्मानमेषु लोकेषु तिष्ठति ।
देवान् यथायथं सर्वान् निवेश्य स्वेषु रश्मिषु ॥ ४ ॥
अग्निरस्मिन्नथेन्द्रस्तु मध्यतो वायुरेव च ।
सूर्यो दिवीति विज्ञेयास्तिस्र एवेह देवताः ॥ ५ ॥
अर्चिभिः केश्ययं त्वग्निर्विद्युद्भिश्चैव मध्यमः ।
असौ तु रश्मिभिः केशी तेनैनानाह केशिनः ॥ ६ ॥
न चैवैषां प्रसूतिर्वा विभूतिः स्थानजन्म वा ।
निर्वक्तुं शक्यमेतैर्हि कृत्स्नं व्याप्तमिदं जगत् ॥ ७ ॥
एतासामेव माहात्म्यान्नामान्यत्वं विधीयते ।
तत्तत्स्थानविभागेन तत्र तत्रोपलक्षयेत् ॥ ८ ॥

तासामियं विभूतिर्हि नामानि यदनेकशः ।
आहुस्तासां तु मन्त्रेषु कवयोऽन्योन्ययोनिताम् ॥ ९ ॥
यथास्थानं प्रदिष्टास्ता नामान्यत्वेन देवताः ।
तद्भक्तास्तत्प्रधानाश्च केचिदेवं वदन्ति ताः ॥ १० ॥
एतद्भूतेषु लोकेषु अग्निभूतं स्थितं त्रिधा ।
त्रिस्थानं चैनमर्चन्ति होत्रायां वृक्तबर्हिषः ॥ ११ ॥
इहैष पवमानोऽग्निर्मध्यमोऽग्निस्तु पावकः ।
अमुष्मिन्नेष विप्रैस्तु लोकेऽग्निः शुचिरुच्यते ॥ १२ ॥
इहाग्निभूतस्त्वृषिभिर्लोके स्तुतिभिरीडितः ।
जातवेदाः स्तुतो मध्ये स्तुतो वैश्वानरो दिवि ॥ १३ ॥
वैश्वानरं श्रितो ह्यग्निरग्निं वैश्वानरः श्रितः ।
अनयोर्जातवेदाश्च तथैतौ जातवेदसि ॥ १४ ॥
सालोक्याच्चैकजातत्वाद् व्याप्तिमत्वात्तु तेजसः ।
यस्य यस्येह देवत्वं दृश्यते ते पृथक् स्तुताः ॥ १५ ॥
सत्वान्यमूर्त्तान्यपि च देवतावन्महर्षयः ।
तुष्टुवुः प्रशशंसुश्च तासु तासु स्तुतिष्विह ॥ १६ ॥
पृथक् पुरस्ताद् ये तूक्ता लोकादिपतयस्त्रयः ।

तेषामात्मैव तत्सर्वं यद्यद्भक्तिः प्रकीर्त्यते ॥ १७ ॥
तेजस्त्वेवायुधं प्राहुर्वाहनञ्चैव तस्य तत् ।
(यदन्यच्चोपकरणं तत्सर्वं तत्र कल्पितम्) ॥ १८ ॥
स्थानं नामानि भक्तीश्च देवतायाः स्तुतौ स्तुतौ ।
सम्पादयन्नुपेक्षेत यां काञ्चिदिह सम्पदम् ॥ १९ ॥
अग्निभक्तिस्तुतान् सर्वानग्नावेव समापयेत् ।
यदिन्द्रभक्ति तच्चेन्द्रे सूर्ये सूर्यानुगञ्च यत् ॥ २० ॥

अग्निभक्तयः

तत्र यत्पृथिवीस्थानं पार्थिवञ्चाग्निमाश्रितम् ।
तत्सर्वमानुपूर्व्येण कथ्यमानं निबोधत ॥ २१ ॥
जातवेदाः श्रितो ह्यग्निमग्निं वैश्वानरः श्रितः ।
द्रविणोदास्तथेध्मश्चे[1] श्रितश्चाग्निं तनूनपात्[2] ॥ २२ ॥
नराशंसः[3] श्रितश्चैनमेनमेवाश्रितास्त्वलः[4] ।
[5]बर्हिर्द्वारश्च[6] देव्योऽग्निमेनमेव तु संश्रिताः ॥ २३ ॥
नक्तोषासा[7] च देव्यौ च होतारावे[8]तदाश्रयौ ।
देव्यस्तिस्रः[9] श्रिताश्चैनं त्वष्टा[10] चैवैतदाश्रयः ॥ २४ ॥

श्रितो वनस्पतिश्चैनं[११] स्वाहाकृतय[१२] आप्रियः ।
दैव्यौ दिव्यप्रसूतौ द्वावग्नी मध्यमपार्थिवौ ॥ २५ ॥
यदि वा वरुणादित्यावग्न्यादित्यौ प्रचेतसौ ।
तथाग्नीवरुणौ वापि केचिदिच्छन्ति सूरयः ॥ २६ ॥
इडा सरस्वती देवी भारती च यथाक्रमम् ।
पृथिव्यामन्तरिक्षे च दिवि देव्य इमा मताः ॥ २७ ॥
तनूनपातमाप्रीषु पठन्ति न पठन्ति च ।

*

अश्वश्च शकुनिश्चैव मण्डूकाश्चैतदाश्रयाः ॥ २८ ॥
ग्रावाणश्चैवमत्ताश्च नराशंसस्तथा रथः ।
दुन्दुभिश्चेषुधिश्चैतं हस्तघ्नोऽभीषवो धनुः ॥ २९ ॥
ज्या चैतदाश्रितेषुश्च श्रिता अश्वाजनी च या ।
वृषभो द्रुघणश्चैनमेनं पितुरुलूखलम् ॥ ३० ॥
नद्यश्चैवैनमापश्च सर्वाश्चौषधयस्तथा ।
रात्र्युषाग्नाय्यरण्यानी श्रद्धेडा पृथिवी तथा ॥ ३१ ॥

*

भजेते चैनमेवार्त्नी द्वन्द्वसूते च रोदसी ।
मुषलोलूखले चैनं हविर्द्धाने च ये स्मृते ॥ ३२ ॥
जोष्ट्री चोर्जाहुती चैनं शुतुद्या च विपाट् सह ।
यौ च देवौ शुनासीरौ तौ चाग्नी चैतदाश्रयौ ॥ ३३ ॥
शौनकस्य शुनासीरौ वायुसूर्य्यावुदाहृतौ ।
शाकपूणेरिन्द्रसूर्य्याविन्द्रो यास्कस्य केवलम् ॥ ३४ ॥

*

लोकोऽयं, यच्च वै प्रातःसवनं क्रियते मखे, ।
अनुष्टुप् च त्रिवृत्स्तोमो, वसन्तशरदावृतू ॥ ३५ ॥
गायत्री, चैकविंशश्च, यच्च साम रथन्तरम् ।
साध्याः, साम च वैराज, माप्त्याश्च वसुभिः सह ॥ ३६ ॥
इन्द्रेण च मरुद्भिश्च सोमेन वरुणेन च ।
पर्जन्येनर्तुभिश्चैव विष्णुना चास्य संस्तवः ॥ ३७ ॥
अस्यैवाग्नेस्तु पूष्णा च साम्राज्यं वरुणेन च ।
देवतावाहनञ्चैव हविषां वहनं तथा ॥ ३८ ॥
कर्म दृष्ट्या च यत्किञ्चित्सम्बद्धं विषये स्थितम् ।

अग्नेरेव तु तत्सर्वं कर्मेति परिभाष्यते ।
इत्युक्तोऽयं गणः सर्वः पृथिव्यग्न्याश्रयो महान् ॥ ३९ ॥

इन्द्रभक्तयः—

यश्चेन्द्रो मध्यमस्थानो गणः सोऽयमतः परः ।
विमानानि च दिव्यानि गन्धर्वाप्सरसां गणः ॥ ४० ॥
इन्द्राश्रयस्तु पर्जन्यो रुद्रो वायुर्बृहस्पतिः ।
वरुणः कश्च मृत्युश्च देवश्च ब्रह्मणस्पतिः ॥ ४१ ॥
मन्युश्च विश्वकर्मा च मित्रः क्षेत्रपतिर्यमः ।
तार्क्ष्यो वास्तोष्पतिश्चैव सरस्वांश्चैवमत्र ह ॥ ४२ ॥
अपां नपाद् दधिक्राश्च सुपर्णोऽथ पुरूरवाः ।
ऋतोऽसुनीतिर्वेनश्च तस्यै तस्याश्रयेऽदितिः * ॥ ४३ ॥
त्वष्टा च सविता चैव वातो वाचस्पतिस्तथा ।
धाता प्रजापतिश्चैव अथर्वाणश्च ये स्मृताः ॥ ४४ ॥
श्येनश्चैवैवमग्निश्च तथेला चैव या स्मृता ।
विधातेन्दुरहिर्बुध्न्यः सोमोऽहिरथ चन्द्रमाः ॥ ४५ ॥

---

* तथेन्दुश्च स्त्रियोऽदितिरित्यपि पाठः ।

विश्वानरश्च वै देवो रुद्राणां[१] संस्तुतो गणः ।
मरुतोऽङ्गिरसश्चैव पितरश्चर्भुभिः[२] सह ॥ ४३ ॥

राका वाक् सरमाप्त्याश्च भृगवोऽन्या सरस्वती ।
यम्युर्वशी सिनीवाली पथ्यास्वस्तिरुषाः कुहूः ॥ ४७ ॥

पृथिव्यनुमतिर्धेनुः सीता लाक्षा[३] तथैव गौः ।
गौरी च रोदसी चैव इन्द्राण्याश्चैष वै पतिः ॥ ४८ ॥

*

छन्दस्त्रिष्टुप् च पङ्क्तिश्च लोकानां मध्यमश्च यः ।
एतेष्वेवाश्रये विद्यात्सवनं मध्यमञ्च यत् ॥ ४९ ॥

ऋतू च ग्रीष्महेमन्तौ यच्च सामोच्यते बृहत् ।
शक्करीषु च यद्गीतं नाम्ना तत्साम शाक्करम् ॥ ५० ॥

आह चास्यैव तौ स्तोमावाश्रयौ शाकटायनः ।
यश्च पञ्चदशो नाम्ना संख्यया त्रिणवश्च यः ॥ ५१ ॥

संस्तुतश्चैष पूष्णा च विष्णुना वरुणेन च ।
सोमवाय्वग्निकुत्सैश्च ब्रह्मणस्पतिनैव च ॥ ५२ ॥

---

१ ऋभूणामिति पाठान्तरम् । २ श्वर्तुभिरिति पाठान्तरम् ।
३ सितेलाख्येति पाठान्तरम् ।

स बृहस्पतिना चैव नाम्ना यश्चापि पर्वतः ।
मित्रश्च स्तूयते देवो वरुणेन सहासकृत् ॥ ५३ ॥
रुद्रेण सोमः पूष्णा च पुनः पूषा च वायुना ।
वातेनैव तु पर्जन्यो लक्ष्यते वै क्वचित्क्वचित् ॥ ५४ ॥
रसादानं तु कर्मास्य वृत्रस्य च निवर्हणम् ।
स्तुतेः प्रभुत्वं सर्वस्य बलस्य निखिला कृतिः ॥ ५५ ॥
इत्यैन्द्रो मध्यमस्थानो गणः सम्यगुदाहृतः ।
यः परस्तु गणः सौर्य्यो द्युस्थानस्तं निबोधत ॥ ५६ ॥

सूर्य्यभक्तयः—

तस्य मुख्यतमौ देवावश्विनौ सूर्य्यमाश्रितौ ।
वृषाकपायी सूर्य्योषाः पत्न्यस्तिस्रो रवेरिमाः ॥ ५७ ॥
अमुतोऽर्वाङ् निवर्तन्ते प्रतिलोमास्तदाश्रयाः ।
पुरोदयात्तामुषसं सूर्य्यां मध्यन्दिने स्थिते ॥ ५८ ॥
वृषाकपायीं सूर्य्यास्तकाल आहुः स्तुतिष्वृचि* ।
तस्याश्रये सरण्यूश्च भगः पूषा वृषाकपिः ॥ ५९ ॥

* सूर्य्यस्य तामेवाहुस्तु निम्रुचि—इत्यपि पाठः ।

यमो वैश्वानरो विष्णुर्वरुणश्चैकपादजः ।
पृथिवी च समुद्राश्च देवाः सप्तर्षयश्च ये ॥ ६० ॥
आदित्याः केशिसाध्याश्च सविता वसुभिर्मनुः[१] ।
दध्यङ्ङथर्वा विश्वे च वाजिनो देवयोषितः ॥ ६१ ॥

*

असौ लोक, स्तृतीयश्च सवनं, साम रैवतम् ।
वैरूपश्चैव, वर्षाश्च शिशिरोऽथ ऋतुस्तथा ॥ ६२ ॥
त्रयस्त्रिंशश्च यः स्तोमः क्लृप्ता सप्तदशश्च यः ।
छन्दश्च जगतीनाम्ना तथातिच्छन्दसश्च याः ॥ ॥ ६३ ॥
पौरुषं चाहुरस्यैतत्सर्वमेव तु पौरुषम् ।
एतस्यैव तु विज्ञेया देवाः संस्तविकास्त्रयः ॥ ६४ ॥
चन्द्रमाश्चैव वायुश्च यश्च संवत्सरं विदुः ।
हरणं तु रसस्यैतत्कर्मणाऽमुत्र रश्मिभिः ॥ ६५ ॥
येन नातिविजानन्ति सर्वभूतानि चक्षुषा[२] ।
इत्थमग्नीन्द्रसूर्य्याणां भक्तयः समुदाहृताः ॥ ६६ ॥

---

१ आदित्यपूगः साध्याश्च सार्द्धश्च वसुभिर्मनुरिति पाठान्तरम् ।
२ येन नातिविजानन्ति सूर्य्यभूतानि चक्षुषा ।
यानीमानि च पश्यन्ति सर्वभूतानि तेजसा इति । पाठान्तरे

अग्नीन्द्रमरुतस्त्वष्टाऽश्विनौ देवावृतावृधौ ।
द्रविणोदा इमाः सप्त भवन्ति ऋतुदेवताः ॥ ६७ ॥
यो वायुरिन्द्रवायू यौ यौ मित्रावरुणावपि ।
यावाश्विनौ य इन्द्रो ये विश्वेदेवाः सरस्वती ॥ ६८ ॥
प्रातःसवनिके शस्त्रे प्रउगे सप्त देवताः ।
भवन्ति ताः क्रमेणैता अनुबन्धान्निरूपिताः ॥ ६९ ॥

अग्नीन्द्रसूर्य्याणां नामभेदाः —

अग्नेस्तु पञ्च नामानि यानि सूर्यस्य वा नव ।
षड्त्रिंशतिस्तथेन्द्रस्य क्रमाद्वक्ष्यामि तान्यपि ॥ ७० ॥

अग्निनामानि पञ्च

१ अग्निः—सर्वे

जातो यदग्रे भूतानामग्रणीरध्वरे च यत् ।
अङ्गं संनयते तस्मात्स्तुतोऽग्निरिति सूरिभिः ॥ ७१ ॥

२ द्रविणोदाः—कुत्सः

धनं बलं वा द्रविणं प्रायच्छद्येन कर्म्मणा ।
तत्कर्म दृष्ट्वा कुत्सस्तु प्राहैनं द्रविणोदसम् ॥ ७२ ॥

३ तनूनपात्-

अयं तनूनपादग्निः, असौ हि तननात्तनुः ।
ततस्तु मध्यमे जज्ञे स्थानेऽयं मध्यमात्ततः ॥ ७३ ॥
अनन्तरां प्रजामाहुर्न पादिति कुपण्यवः ।
नपादमुष्य चैवायमग्निस्तेन तनूनपात् ॥ ७४ ॥

४ नराशंसः-

पृथक्त्वेन समत्वेन यज्ञे यच्छस्यते नृभिः ।
स्तुवन्त्याशीषु तेनेमं नराशसं तु कारवः ॥ ७५ ॥

५ पवमानः-वैखानसाः

पुनाति यदिदं विश्वमेषोऽग्निः पार्थिवोऽप्सु सन् ।
वैखानसर्षिभिस्तेन पवमान इति स्तुतः ॥ ७६ ॥

इन्द्रनामानि षड्विंशतिः ।

१ जातवेदाः—

भूतानि वेद यज्जातो, जातैर्यद्वाऽथ विद्यते ।
यद्वैष जातविद्योऽभूद्, वित्तं जातोऽधिवेत्ति वा ॥ ७७ ॥
विद्यते सर्वभूतेषु, यद्वा जातः पुनः पुनः ।
तेनैष मध्यभागिन्द्रो जातवेदा इति स्तुतः ॥ ७८ ॥

२ वायुः—

अणिष्ठ एष यत्तु त्रीन् व्याप्यैको व्योम्नि तिष्ठति ।
तेनैनमृषयोऽर्चन्तः कर्मणा वायुमब्रुवन् ॥ ७९ ॥

३ वरुणः—

त्रीणीमान्यावृणोत्येको मूर्त्तेन तु रसेन यत् ।
तदेनं वरुणं शक्त्या स्तुतिष्वाहुः कृपण्यवः ॥ ८० ॥

४ रुद्रः—

अरोदीदन्तरिक्षे यद्विद्युद्वृष्टिं ददन्नृणाम् ।
चतुर्भिर्ऋषिभिस्तेन रुद्र इत्यभिसंस्तुतः ॥ ८१ ॥

५ इन्द्रः—

चतुर्विधानां भूतानां प्राणो भूत्वा व्यवस्थितः ।
ईष्टे चैवास्य सर्वस्य तेनेन्द्र इति स स्मृतः ॥ ८२ ॥
इरां दृणाति यत्काले मरुद्भिः सहितोऽम्बरे ।
रवेण महता युक्तस्तेनेन्द्रमृषयोऽब्रुवन् ॥ ८३ ॥
रसान् रश्मिभिरादाय वायुनायं गतः सह ।
वर्षत्येष च यल्लोके तेनेन्द्र इति स स्मृतः (सूर्य्यः)॥ ८४ ॥

६ पर्जन्यः—अत्रिः, और्वशः

यदिमां प्रार्जयत्येको रसेनाम्बरजेन गाम् ।
कालेऽत्रिरौर्वशश्चर्षी तेन पर्जन्यमाहतुः ॥ ८५ ॥
तर्पयत्येष यल्लोकान् जन्यो जनहितश्च यत् ।
परो जेता जनयिता यद्वाऽऽत्रेयस्ततो जगौ ॥ ८६ ॥

७ बृहस्पतिः—

बृहन्तौ पाति यल्लोकावेव द्वौ मध्यमोत्तमौ ।
बृहता कर्मणा तेन बृहस्पतिरितीडितः ॥ ७८ ॥

८ ब्रह्मणस्पतिः—शौनहोत्रः

ब्रह्म वाक् ब्रह्म सत्यञ्च ब्रह्म सर्वमिदं जगत् ।
पातारं ब्रह्मणस्तेन शौनहोत्रः स्तुवञ्जगौ ॥ ८८ ॥

९ वाचस्पतिः—

वाचा वेदा ह्यधीयन्ते वाचा छन्दांसि तत्र ह ।
अथो वाक् सर्वमेवेदं तेन वाचस्पतिः स्तुतः ॥ ८९ ॥

१० वास्तोष्पतिः—और्वशः

वास्तु प्रयच्छँल्लोकस्य मध्यमस्य तु पाति यत् ।
तेन वास्तोष्पतिं प्राह चतुर्भिरिममौर्वशः ॥ ९० ॥

११ क्षेत्रस्य पतिः—वामदेवः

क्षेमं[1] क्षितिभ्यो विदधद्यदतुष्यद्विशत् क्षितौ[2] ।
तेनैनमाह क्षेत्रस्य वामदेवः स्तुवन् पतिम् ॥ ६१ ॥

१२ ऋतम्—

मनसेमं तु यं दृश्यं मध्यमं लोकमाश्रितम् ।
शंसत् सत्येन सत्ये वै स एष स्तुतवानृतम् ॥ ६२ ॥

१३ ऋतस्य श्लोकः—

रेवणान्नरसैः क्षिप्तैः स्थितो व्योम्न्येष मायया ।
ऋतस्य श्लोक इत्येष पुनश्चैनं ततोऽब्रवीत् ॥ ६३ ॥

१४ अदितिः—गौतमः

न कुतश्चैष यद्दीनो वृत्वा तिष्ठति मध्यमः ।
राहूगण ऋषिस्तेन प्राहैनं गौतमोऽदितिम् ॥ ६४ ॥

---

१ अन्नमिति पाठान्तरम् ।
२ ददाति यदिमं क्षेत्रे त्वृतावम्बरजं पुनरित्यपि पा :

१५ कम्—

प्रजाभ्यस्त्वेष यच्छक्त एष वीरः शिवः सुखः ।
हिरण्यगर्भस्तेनैनमृषिरर्चन्नुवाच कम् ॥ ६५ ॥

१६ यमः—

इह प्रजाः प्रयच्छन् स संगृहीता प्रयाति च ।
ऋषिर्विवस्वतः पुत्रं तेनाहैनं यमो यमम् ॥ ६६ ॥

१७ मित्रः— विश्वामित्रः

मित्रङ्कस्य जना विश्वे यदिमं पर्य्युपासते ।
मित्र इत्याह तेनैनं विश्वामित्रः स्तुवन् स्वयम् ॥ ६७ ॥

१८ विश्वकर्म्मा—

निदाघमासातिगमे यद्देतेनाववर्ति क्षितिम् ।
विश्वस्य जनयन् कर्म विश्वकर्मैष तेन सः ॥ ६८ ॥

१९ सरस्वान्—

सरांसि घृतवन्त्यस्य सन्ति लोकेषु यत् त्रिषु ।
सरस्वन्तमिति प्राह वाचं प्राहुः सरस्वतीम् ॥ ९९ ॥

२० वेनः—भार्गवः

प्राणभूतस्तु भूतेषु यद्वितत्येह तिष्ठति * ।
तेनैनं वेनमाहर्षिर्वेनो नामेह भार्गव : ॥ १०० ॥

२१ मन्युः—

ससृजे मासि मास्येनमभिमत्य ततो व्रजन् ।
तेनैनं मन्युरित्याह मन्युरेव तु तापसः ॥ १०१ ॥

२२ असुनीतिः— श्रुतबन्धुः

यदन्तकाले भूतानामेक एव नयत्यसून् ।
येनासुनीतिरुक्तोऽयं स्तुवता श्रुतबन्धुना ॥ १०२ ॥

* यद्वेनत्येषु तिष्ठतीति पाठान्तरम् ।

२३ अपां नपा—गृत्समदः

निदाघमासातिगमे जन्म मध्ये भवत्यपाम् ।
नपात्स्याह तेनैनमृषिर्गृत्समदस्त्वपाम् ॥ १०३ ॥

२४ दधिक्राः—

अपामम्बरगर्भौघमादधत्सोऽष्टमासिकम् ।
यत्क्रन्दत्यसकृन्मध्ये दधिक्रास्तेन कथ्यते ॥ १०४ ॥

२५ धाता—

मासेन संभृतं गर्भं नवमेनाष्टमासिकम् ।
स्वयं क्रन्दन् दधात्युर्व्यां धातेत्यृग्भिः सगीयते ॥ १०५॥

२६ तार्क्ष्यः—

स्तीर्णोऽन्तरिक्षे क्षियति यद्वा तूर्णं क्षरत्यसौ ।
अरिष्टनेमिस्तार्क्ष्यर्षिस्तार्क्ष्यं तेनैनमुक्तवान् ॥ १०६ ॥

सूर्यनामानि नव

१ पुरूरवा:—

रुवन् व्योरून्युदयं याति कृन्तन् भाद्रिस्तजन्नपः ।
पुरूरवसमाहैनं स्ववाक्येनोरुवासिनी ॥ १०७ ॥

२ सविता—

संवर्तयँस्तमः सूर्य्यादुषसञ्च प्रवर्तयन् ।
दिवा चरन् प्रसौत्येकः सविता तेन कर्म्मणा ॥ १०८ ॥

३ भगः—वसिष्ठः

उदितोऽभासयल्लोकानिमांश्चैष स्वरश्मिभिः ।
स्वयं वसिष्ठस्तेनैनमृषिराह स्तुवन् भगम् ॥ १०९ ॥

४ पूषा—

उद्यन् जगत्पोषयति प्रणुदन् रश्मिभिस्तमः ।
तेनैनमस्तौत्पूषेति भरद्वाजस्तु पञ्चभिः ॥ ११० ॥

५ विश्वानरः—

संप्रत्येकैकशस्त्वेनं यन्मन्यन्ते पृथङ्नराः ।
विश्वे विश्वानरस्तेन कर्मणा स्तुतिषु स्तुतः ॥ १११ ॥

६ मृत्युः—

यत्तु माच्यावयन्नेति घोषेण महता मृतम् (मृधे) ।
तेन मृत्युमिमं सत्रं स्तौति मृत्युरिति स्वयम् ॥ ११२ ॥
नाम्ना संकुसुको नाम यमपुत्रो जघन्यजः ।

७ वृषाकपिः—

वृषैष कपिलो भूत्वा यन्नाकमधिरोहति ॥ ११३ ॥
वृषाकपिरसौ तेन विश्वस्मादिन्द्र उत्तरः ।
रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ एव सः ॥ ११४ ॥
सायाह्नकाले भूतानि स्वापयन्नस्तमेति यत् ।
वृषाकपिरितो वा स्यादिति मन्त्रेषु दृश्यते ॥ ११५ ॥

८ केशी—

कृत्वा सायं पृथग्याति भूतेभ्यस्तमसोऽस्यये ।
प्रकाशं किरणैः कुर्वन् तेनैनं केशिनं विदुः ॥ ११६ ॥

६ त्रिविक्रमः—मेधातिथिः

त्रीणि भान्ति रजांस्यस्य यत्पदानि तु तेजसा ।
तेन मेधातिथिः प्राह विष्णुमेनं त्रिविक्रमम् ॥ ११७ ॥

विष्णुः—

विष्णातेर्विशतेर्वा स्याद्वेवेष्टेर्व्याप्तिकर्म्मणः ।
विष्णुर्निरुच्यते वातः सर्वः सर्वान्तरश्च सः ॥ ११८ ॥

पञ्च षड्विंशतिस्तद्वन्नव नामानि यानि च ।
इत्थमग्नीन्द्रसूर्य्याणां तान्युक्तानि यथाक्रमम् ॥ ११९ ॥
दैवतोपपरीक्षेयं शौनकोक्ता प्रदर्शिता ।
प्रमाणं तस्य याथार्थ्ये भगवान् वेदपूरुषः ॥ १२० ॥

इति बृहद्देवतावर्गः १०

वर्गा इमे दैवादिव्ययनरधर्म्मक्रियाव्ययैः ।
नैगमद्वयनानार्थैर्बृहद्दवतयापि च ॥ १ ॥
एतैस्तु दशभिर्वर्गैर्निघण्टूक्ता यथायथम् ।
गृहीताः श्लोकबन्धेन शब्दाः प्रायेण वैदिकाः ॥ २ ॥
इतीत्थं माधुसूदन्या सरस्वत्या प्रसन्नया ।
समीक्षाचक्रवर्तिन्या मणिमाला प्रवर्तिता ॥ ३ ॥
सन्ति यद्यपि भूयांसः शब्दा अन्येऽपि वैदिकाः ।
तथापीह निघण्टूक्ताः सर्वे तावत्प्रदर्शिताः ॥ ४ ॥
तेन मे भगवान् वेदपुरुषः परमेश्वरः ।
प्रसीदतु सदेत्येवमाशासे मधुसूदनः ॥ ५ ॥

मिथिलापश्चिमभागे
श्रीक्षेत्रस्यातिसन्निधौ पुण्ये ।
यो गाढासंस्थाने-
ऽलभत श्रीवैद्यनाथतो जन्म ॥ ६ ॥

भारतपश्चिमभागे
पुष्करतीर्थातिसन्निधौ पुण्ये ।

अथपुरराजद्वारे-
ऽलभत महीपालतोऽभ्यर्हाम् ॥ ७ ॥

वयसः पश्चिमभागे
वेदमहातीर्थसन्निधौ पुण्ये ।
कृतधीः श्रीमधुसूदन-
शर्मा सोऽकृत सरस्वतीमालाम् ॥ ८ ॥

मालापश्चिमभागे
विद्यातीर्थातिसन्निधौ पुण्ये ।
मनसो योगं कुर्वन्
सुखतः सर्वं लभेत वेदार्थम् ॥ ९ ॥

इति सरस्वतीमणिमालाख्यो वैदिकशब्दकोशः

श्रीरस्तु

शुभमस्तु

श्रीः

अकारादि वर्णानुक्रमेणानुक्रमणिका ।

	पृष्ठ श्लो०		पृष्ठ श्लो०
क्षुल्लक:	१४ । ३	खेदा	७ । १०
क्षत्रस्यपति:	३ । १९	,,	५३ । २
क्षोण:	४३ । ८३	गणा:	१७ । १८
क्षोणम्	५३ । ८३	,,	१ । ३
क्षोणि:	६ । ४	गणिता	३९ । ५०
क्षोणी	६ । २	गण्यम्	३९ । ५१
क्षोद:	१० । २७	गन्ति	२२ । ६
क्षोदति	२२ । ५	गनीगन्ति	२३ । ९
क्ष्मा	७ । ५	गभस्तय:	७ । १०
खजे	१९ । ३१	,,	१६ । १४
खले	१९ । ३१	गभस्ती	१६ । १२
खा:	१० । २८	गभीर:	१३ । १
खात:	२१ । ४१	गभीरम्	९ । १२

	पृष्ठ श्लो०		पृष्ठ श्लो०
गूर्द्धयति	२३ । १३	ग्ना	१७ । २१
गृणाति	२३ । १३	ग्नाः	५२ । १
गृत्सः	१२ । ३	ग्मा	७ । ५
गोत्रः	८ । १८	ग्रावा	८ । १८
गोत्रा	६ । ४	,,	२ । ११
गौः	४ । २३	घर्म	१६ । १७
,,	६ । ४	घर्मः	८ । १२
,,	३७ । २७	घृणाः	८ । १२
,,	५३ । १	घृणिः	५७ । ३१
,,	१७ । १८	,,	२१ । ४३
,,	१२ । ४	घृतम्	६ । ३२
,,	३७ । २७	घृतवर्ती	६ । २
गौरी	१७ । १८	घृताची	८ । ११

शब्द	पृष्ठ	श्लो०	शब्द	पृष्ठ	श्लो०
सुः	२०	३६	वाज	२०	३८
स्रवः	७	११	वाजगन्ध्यः	४०	५२
	१	३	वाजपस्त्यः	४०	५२
स्तोः	८	१२	वाजयति	२४	१४
स्वी	८	१५	वाजसातौ	२६	३२
हते	२२	८	वाजिनी	८	१३
ह्न	१०	३३	वाजिनीवती	८	१३
:	९	२१	वाजी	१०	३२
क्	१७	२१	वाजे	१९	३३
	४	२३	वाञ्छति	२५	२१
वतः	१२	३	वाणाः	१७	१८
	१२	५	वाणी	१७	१९
चस्पातिः	३	१९	वाणीची	१७	१९

शुभम्

इति ।

शुद्धिपत्रम् ।

शुद्धम्	अशुद्धम्	पृष्ठ	पङ्क्तौ ।
सिन्धुः	सिन्धु	४	१३
ऋतस्ययोनिः	ऋतस्य योनिः	१०	३
ऋतु	ऋतु	१६	७
वेकुरा	वेकुरो	१७	६
वाचो	वचो	१७	१०
स्तवस्तरः	स्तनस्तरः	१८	५
सचति	चसति	२२	१५
विद्रधे	विद्रघे	३०	३
सोमो अश्वाः	सामोश्वाः	३०	१४
पड्भिः	षड्भिः	३१	१
पदि	पदिः	३१	८

शुद्धम्	अशुद्धम्	पृष्ठे	पङ्क्तौ ।
रसिन्वती	रि सन्वति	३२	१
बृन्दं	बृंदं	३२	१६
वृन्दो	बुन्दो	३२	१६
नूत्र	नू च	३६	४
निर्देशे	निर्द्दिशे	४१	२
अयर्यवो	अयेर्य्यवो	४१	६
मत्वात्तु	मत्त्वा तु	४२	१५
मृतानि	मूतीनि	४३	१६
स्याद्	स्यदि	४४	१७
ये नाश्रयन्ति	येनाशयन्ति	४६	३
वार्द्धुषिका	वार्द्धुपिका	४६	१३
मनाश्रितः	समाश्रितः	४७	१६
स्याद्	स्यद्	४८	२

शुद्धम्	अशुद्धम्	पृष्ठ	पङ्क्तो ।
गम्भीर	भारमु-	५६	११
गम्भीरो	गम्भीरा	५६	११
हरितो	हीरतो	६२	१५
दकयो	दे कयो	६२	१७
वधेगत्यां	वधेगत्यां	६३	७
वनुष्यति	वनुष्पति	६३	१४
याथार्थ्य	यथार्थ्य	६४	३
विभागेव	विभागन	६५	१६
नराशंसं	नराशसं	७५	६
जनहितं च	जनहितंश्च	७७	११
हिरण्यगर्भः	हिरण्यगभः	८०	२

द्वितीयपृष्ठे सप्तमश्लोकानन्तरं पञ्चमपृष्ठीयद्वात्रिंशत्तमः, षष्ठपृष्ठीयत्रयस्त्रिंशत्तमः श्लोकश्च संनिवेश्यौ । तदनन्तरमधस्ताच्च, इतित्रिलोकीस्था देवताः ॥' इत्येतावान् पाठः संनिवेश्यः ।

सप्तमपृष्ठे दिग्वाचकशब्दाः किरणवाचकशब्देभ्यःपूर्वं पाठ्याः ॥

पुस्तकप्राप्तिस्थानम्—

संस्कृतरत्नाकरकार्यालयः ।

जयपुरम् ।

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर छै नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा।
